# नन्दनवनकल्पतरुः १



शासनसम्राजामिह समुदाये मेरुपर्वतौपम्ये ॥
कल्पतरुर्नन्दनवनसत्कोऽयं नन्दतात् सुचिरम् ॥

प्रथमा शाखा
(उत्तरायणम्)
वि.सं. २०५५

सङ्कलनम्
कीर्तित्रयी

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# नन्दनवनकल्पतरुः १



शासनसम्राजामिह समुदाये मेरुपर्वतौपम्ये ।।
कल्पतरुर्नन्दनवनसत्कोऽयं नन्दतात् सुचिरम् ।।

प्रथमा शाखा
(उत्तरायणम्)
वि.सं. २०५५

सङ्कलनम्
कीर्तित्रयी

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नन्दनवनकल्पतरुः ॥ प्रथमा शाखा ॥
(संस्कृतभाषामयं अयन-पत्रम् ॥)

सङ्कलनम् : कीर्तित्रयी ॥

सर्वेऽधिकाराः स्वायत्ताः ॥

प्रकाशनम् : श्रीजैनग्रन्थप्रकाशनसमितिः, खंभात ॥

प्रथमं मुद्रणम् - वि. सं. २०५५, ई.स. १९९९

वि. सं. २०५५, ई.स. २००२, पुनर्मुद्रणम्-

मूल्यम् - संस्कृतसाहित्यरुचिः ॥

प्राप्तिस्थानम् : श्रीविजयनेमिसूरीश्वरजी स्वाध्यायमंदिर
१२, भगतबाग, शेठ आणंदजी कल्याणजी पेढी समीप,
पालडी, अमदावाद - ३८० ००७

सम्पर्कसूत्रम् : **"विजयशीलचन्द्रसूरिः"**
C/o. अतुल एच्. कापडिया A/९, जागृति फ्लेट्स, महावीर टावर पाछळ,
पालडी, अमदावाद - ३८० ००७. फोन : **079-6588879**

मुद्रणम् : 'प्रारंभ', अमदावाद ॥
फोन : **079 - 65 65 65 3** मोबाईल : **9825011414**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# प्रास्ताविकम् ॥

प्रवर्तमानः संवत्सरः पूजनीयचरणानां स्पृहणीयचरितानां च पूज्यपादाचार्य-भगवतांश्रीविजयनन्दनसूरीश्वराणां जन्मशतीसंवत्सरः। 'वयं साधवोऽस्य परम-सुभगस्याऽवसरस्योद्यापनं कथं कुर्याम ?' इति प्रश्नोऽस्माकं मनसि कतिपय-मासेभ्यः पूर्वं प्रादुर्भूतः । तस्य निराकरणमपि तत्क्षणमेव चित्ते स्फुरितं यदेक-मनियतकालिकं गीर्वाणभाषाखचितं नूतनरचनानिचितं सामायिकं यदि प्रकाश्यते तर्ह्येकतः पूज्यपादेभ्यः सूरिभगवद्भ्यः स्मरणाञ्जलिरपि दीयेत, अन्यतो मुनीनां स्वाध्यायो लेखनपाटवं चाऽपि स्यात् । स्फुरणैषा त्वरितं निर्णयत्वेन परिणता। तन्निर्णयस्य फलमिदं तत्रभवतां भवतां करकमले अलङ्कुर्वदस्ति।

सर्वेषां संस्कृत-प्राकृतादिभाषाविदां साधुभगवतां प्रति साध्वीभगवतीनां च प्रति निवेद्यते यद् अस्मिन्नयनपत्रे भवतां लेखान् प्रेषयन्तु । लेखाः कागदपत्र-स्यैकस्मिन्नेव पार्श्वे शिरोरेखामण्डितैरेव च सुवाच्यैरक्षरैर्मण्डिताः स्युरित्यस्माक-मपेक्षाऽस्ति।

प्रथम एव प्रयत्नोऽयं कीर्तित्रयीनामधारिणो मुनित्रितयस्य श्रीरत्न-धर्म-कल्याणकीर्तिविजयेतिनामकस्याऽस्ति । अतस्तत्र किञ्चिदपि न्यूनं स्यात् , काचित् क्षतिर्वा स्यात् तर्हि तन्मार्जनं विद्वद्भिरवश्यं कर्तव्यं, अस्मान् प्रति तद्विषये सूचनाऽपि सप्रेम प्रेष्येति सादरं निवेद्यते।

नन्दनवनतीर्थ-प्रतिष्ठादिनम् शी.
फा. शु. ५, २०५५
तगडी

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## ॥ आशीर्वचनम् ॥

ॐ

अस्य नन्दनवनकल्पतरोः प्रथमविभागस्य कृतीनां रचियतारो मुनयो लेखने स्वाध्याये च सततं प्रवृत्तिशीलाः स्युरित्याशासमानस्य सूर्योदयसूरेः हार्दिकी शुभाशीः॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# अनुक्रमः


| कृतिः | कर्ता | पृष्ठ |
|---|---|---|
| ॥ चतुर्विंशतिजिनगीतयः ॥ | विजयशीलचन्द्रसूरिः | १ |
| ॥ श्रीगौतमाष्टकम् ॥ | मुनिधर्मकीर्तिविजयः | २६ |
| ॥ परमगुरु-तातपाद-गीतिः ॥ | विजयशीलचन्द्रसूरिः | २७ |
| ॥ गुरुवन्दना ॥ | मुनिधर्मकीर्तिविजयः | २८ |
| ॥ गुरुगुणगीतिः ॥ | विजयशीलचन्द्रसूरिः | २९ |
| ॥ गुरुस्तुत्यष्टकम् ॥ | मुनिरत्नकीर्तिविजयः | ३० |
| ॥ भावाञ्जलिः ॥ | मुनिरत्नकीर्तिविजयः | ३२ |
| चरित्र कथा — वात्सल्यनिधिः सङ्घनायकः | मुनिकल्याणकीर्तिविजयः | ३५ |
| आस्वादः — ॥ चिन्तनधारा ॥ | मुनिरत्नकीर्तिविजयः | ६१ |
| ॥ धर्मस्वरूपम् ॥ | मुनिधर्मकीर्तिविजयः | ६५ |
| ॥ सर्वं सत्त्वे प्रतिष्ठितम् ॥ | मुनिकल्याणकीर्तिविजयः | ६९ |


Jain Education International For Private & Personal Use Only www.jainelibrary.org

# अनुक्रमः


| कृतिः | कर्ता | पृष्ठ |
|---|---|---|
| ॥ काव्यानुवादयुगलम् ॥ | मुनिधर्मकीर्तिविजयः | ७२ |
| **कथा** | | |
| ॥ धर्म एव वरं धनम् ॥ | मुनिरत्नकीर्तिविजयः | ७४ |
| ॥ तर्कयोग्यं रामायणम् ॥ | मुनिधर्मकीर्तिविजयः | ७७ |
| ॥ झेनकथा ॥ | मुनिधर्मकीर्तिविजयः | ७९ |
| ॥ बादरायणसम्बन्धः ॥ | मुनिकल्याणकीर्तिविजयः | ८० |
| ॥ मधुरेण समापयेत् ॥ | | |
| को मूर्खः ? | मुनिरत्नकीर्तिविजयः | ८२ |
| पुनरेकशः | मुनिधर्मकीर्तिविजयः | ८३ |
| हास्यं निषिद्धम् | मुनिकल्याणकीर्तिविजयः | ८३ |




Jain Education International For Private & Personal Use Only www.jainelibrary.org

नमो नम: श्रीगुरुनेमिसूरये ।।

ऐँ नम: ।।

# ।। चतुर्विंशतिजिनगीतय: ।।

उद्गाता - विजयशीलचन्द्रसूरि:

१

## ।। श्रीऋषभजिनगीति: ।।

वन्दे नाभितनूजन्मानं

पृथ्वीशं प्रथमं पृथुकीर्तिं प्रथितविमलमहिमानम्......

सृष्ट्यादाविह भरते योऽखिल-सद्व्यवहारनिदानं,

दातारं प्रथमं त्रातारं प्रथमं ज्ञाननिधानम्.............१

स्रष्टारं प्रथमं द्रष्टारं प्रथमं गुरुमविगानं,

प्रथमं वैज्ञानिकमथ विश्वे विश्वेश्वरतास्थानम्.........२

प्रथमं विश्वपतिं **श्रीवृषभं** धर्मे वृषभसमानं,

वृषभाङ्कितपदकमलं सुरवर-वधूरचितगुणगानम्.....३

ज्योतिर्मयमानन्दघनं हत-सर्वकठिनकर्माणं,

शुचिशीलं गतभवलीलं तं विहितभुवनकल्याणम्...४



Jain Education International For Private & Personal Use Only www.jainelibrary.org

२

# श्रीअजितनाथजिनगीतिः ॥

अद्वितीयं द्वितीयं जिनं संस्तुवे
कर्ममल्लैरजितमष्टसङ्ख्यैः ।
**अजितनाथा**भिधं विजितसकलद्विधं
त्रिविधमभिवन्दितं त्रिदशमुख्यैः ॥१॥

कलभगतिगामुकं मुक्तिरतिकामुकं
मत्तगजलाञ्छितं पादपद्म ।
स्वर्णवर्णच्छविं पुण्यपङ्कजरविं
नाशयन्तं च पापापदं मे ॥२॥

रागभङ्गं त्वया कुर्वतोपार्जितो
विश्वरागो महच्चित्रमेतत् ।
द्वेषविजयं तथा कुर्वता तदुपरि
द्विष्टमेवेत्यहो! चित्रमपि तत् ॥३॥

धर्मसाम्राज्यवरनायकं दायकं
धर्मतत्त्वस्य परिचायकं च ।
भीमभवसिन्धुतस्त्राणशीलं सदा
भावप्राणेश्वरं मामकं च ॥४॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

३

# श्रीसम्भवनाथजिनगीतिः ॥

तारय तारय रे **सम्भवजिन**! मां तारय
मारय मारय रे मोहरिपुं मम मारय....

कारय निरुपमसमतानन्दं
निजगुणगणनिःष्यन्दं,
वारय विषमममत्वस्पन्दं
संवर्धितभवकन्दम्.........१

विस्तारय सुविवेकाभोगं
योगविलसदुपयोगं,
दारय दुर्मतिदारुणरोगं
कृतसततशुभयोगम्........२

विनिवारय मयि कर्मकुदृष्टिं
रचय **शील**सुखसृष्टिं,
धारय मम विज्ञप्तिं, कुरु कुरु
मयि करुणारसवृष्टिम्........३



Jain Education International For Private & Personal Use Only www.jainelibrary.org

४

# श्रीअभिनन्दनजिनगीतिः ॥

श्रीअभिनन्दन! जगदानन्दन!
संवरनन्दन! श्रेष्ठ! रे।
विश्वविहितवन्दन! सुखस्यन्दन!
दुरितनिकन्दन! प्रेष्ठ! रे ॥१॥
गतिचतुष्कनिर्मूलनकारण!
चतुर्धर्मसन्धारण! रे।
तुर्यजिनेश्वर! तुर्ये ध्याने
स्थापय मां भववारण! रे ॥२॥
भवनीडेऽहं कृतबहुपीडे
निर्व्रीडं क्रीडामि रे।
निजमात्मानं कृतपाप्मानं
कर्मभिरथ पीडामि रे ॥३॥
इत्थं मम दुरितैर्मयका मम
मूर्धनि सृष्टं शूलं रे।
पाहि पाहि मां त्राणशील जिन!
शीघ्रं नय भवकूलं रे ॥४॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

५

# श्रीसुमतिनाथजिनगीतिः ॥

**सुमतिजिन**! तव चरणौ प्रणमामि
**सुमतिजिन**! अघकरणाद् विरमामि

तव चरणौ न्यक्कृतजनि-मरणौ मोहमल्लसंहरणौ
कृतजगदुद्धरणौ भवरणतोऽहर्निशमहं भजामि..........१

तव चरणौ बहुशतशुभलक्षण-लक्षितमङ्गलकरणौ
देव-दनुज-मनुजैः कृतशरणौ भक्त्या नाथ! यजामि.....२

त्वच्चरणाश्रयणं कुर्वाणः पापाचरणमनुचितम्
अपि बहु रुचितं मम बहु कालात् तत्कालं विसृजामि....३

तव चरणौ समवाप्य शरणमिह जातोऽहं जितभवभीः
करुणाशील! कुगतिमधुना तव कृपया नैव व्रजामि......४



Jain Education International For Private & Personal Use Only www.jainelibrary.org

६

# श्रीपद्मप्रभजिनगीतिः ॥

वन्दे पद्मप्रभमभिरामं
रक्तोत्पलदलसन्निभदीप्तिं
तृप्तिप्रदमविरामम्......१
रक्तपद्मलाञ्छितपदपद्मं
छद्मविहीनमकामम्....२
दिनकरवन्निजकरभरप्रसरै-
र्बोधितभव्यारामम्.....३
ऊर्जितचरणं निर्जितकरणं
तर्जितदोषग्रामम्.......४
विगतविभावं प्रकटस्वभावं
शीलसदनमुद्दामम्.....५



Jain Education International For Private & Personal Use Only www.jainelibrary.org

७

# श्रीसुपार्श्वनाथजिनगीतिः ॥

रे मम मनसि मुदा त्वं वसतु
देव! **सुपार्श्व**! सदा तव ध्यानं मम हृदये प्रविलसतु....

मम चित्तं बहुदोषकलुषितं पर्युषितं ननु कमलं
त्वद्दर्शनमधुरामृतसेकात् शुचि भूत्वा प्रविकसतु......१

असमप्रशमरसखचितां निचितां गुणपरमाणुसमूहैः
तव मुखमुद्रां वीक्ष्योन्मुद्रां नयनयुगं मम हसतु........२

भीमभवारण्येऽशरणोऽहं लुट्यति मां मोहारिः
अधुना स्वीकुर्वे तव शरणं येनाऽसौ सन्त्रसतु.........३

अभयदान**शीलो**ऽसि त्वमिति श्रुत्वां त्वां प्रतिपन्नः
दुर्गतिभयभीतेऽथ विभो! तव करुणा मयि उल्लसतु....४



Jain Education International For Private & Personal Use Only www.jainelibrary.org

८

# श्रीचन्द्रप्रभजिनगीतिः ॥

देव! देवानां दयालो! हे विभो! तुभ्यं नमः
नाथ! चन्द्रप्रभजिनेश्वर! जय विभो! तुभ्यं नमः।
भाग्यहीनैर्नैव लभ्यस्त्वं विभो! तुभ्यं नमः
भागधेयैस्त्वामवाप्तोऽहं विभो! तुभ्यं नमः ॥१॥

निष्कलङ्का निष्कलङ्कपथप्रदानेऽपि क्षमा
शोभना शर्मप्रदाऽथ च शीतला शशधरसमा।
विशदबोधविधानतः सुनिराकृताशेषभ्रमा
जयति भुवने देशना ते हे विभो! तुभ्यं नमः ॥२॥

दृष्ट्वोज्ज्वलं वदनं त्वदीयं भवति मम हृदि कल्पना
किमिदं सितांशुः किमुत भानुः किमथ कमलं काञ्चनम्।
प्रथमः कलङ्की मध्यमः प्रखरस्तृतीयं च क्षयि
वदनोपमं त्वत एव वदनं ते विभो! तुभ्यं नमः ॥३॥

स्वामिन्! समस्तसुपुण्यराशेरेक एव निधिर्भवान्
अनघात्मसद्गुणरत्नराशेरपि भवानेवेश्वरः।
निर्गुणशिरोमणिरहमपुण्यः सेवकोऽस्मि तथाऽपि ते
उदरम्भरित्वं कीदृगेतत् ते ? विभो! तुभ्यं नमः ॥४॥

शीलन्धरस्त्वं शीलरहितोऽहं विभो! तव सेवकः
ज्ञानाकरस्त्वं ज्ञानरहितोऽहं तथा भवदाश्रितः।
परमात्मतत्त्वं त्वं तथा बहिरात्मतत्त्वमहं महद्
भेदं विदारय शीघ्रमेनं हे विभो! तुभ्यं नमः ५॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

९

# श्रीसुविधिनाथजिनगीतिः ॥

सत्यं नाऽहं नहि मम किञ्चित्
अद्यावधि 'सर्वं मम' इति मे मतिरतितीव्रा समभूत्
स्वार्थाधीनं किन्तु तदखिलं मनुते मां यत्किञ्चित्........१

लोकसमाराधनचेष्टायां कालः सुमहान् गमितः
श्रमितोऽहं बहु तत्र तथाऽपि तोषितवान् नहि कञ्चित्...........२

लोकवास्तवमितीक्षित्वाऽथो तत्त्यागोद्यतचेताः
जिनप! त्वामनपेक्षसहायं श्रितवानहमविपश्चित्..........३

**सुविधिनाथ**! मम वारय ममता-महङ्कारमपि दारय
'त्वं मेऽहं तव' इति विश्वासं प्रकटय जिन! मयि भवभित्........४

भक्तिरेव **शीलं** मम धर्मो भक्तिरेव चिरमस्तु
येनाऽहंता-ममतायुगलं त्यजति झटिति जिन! मम हृत्...५



Jain Education International For Private & Personal Use Only www.jainelibrary.org

१०

# श्रीशीतलनाथजिनगीतिः ॥

शिरसा वन्दे शीतलनाथं.....

ज्ञानमनन्तं ज्ञेयानन्तं
यो वहते शिवपाथम्.....१

वचनमनिर्वचनीयगुणमपि
भावामयसत्काथम्......२

त्रिभुवनजनकृतपूजापात्रं
वज्रिरचितगुणगाथम्.....३

निर्दोषं शुचिशीलं शीतल-
मीडे कर्मोन्माथम्........४



Jain Education International For Private & Personal Use Only www.jainelibrary.org

११

# श्रीश्रेयांसनाथजिनगीतिः ॥

विभो! त्वयि भक्तिर्मम हृदि भवतु
भक्तिरेव शक्तिः कलिकाले भक्तिरेव मामवतु.........

भक्तिपदार्थमहं नो वेद्मि नहि नहि भक्त्या रीतिम्
विनवीम्येतत् तव कृपया तद्-बोधो मय्युद्भवतु....१

भक्तिस्त्वत्पदपङ्कजसेवा त्वत्पूजनमपि भक्तिः
आज्ञापालनमपि तव भक्तिः मम मन इदमनुभवतु....२

मुक्तिपदं यावन्नो लप्स्ये **श्रीश्रेयांस**जिनेश!
भक्ति**शील**ता तावदभङ्गं मयि प्रतिभवं प्रभवतु.....३



Jain Education International For Private & Personal Use Only www.jainelibrary.org

१२

# श्रीवासुपूज्यजिनगीतिः ॥

चेतन! चल चल जिनवरचरणे
चल चल वासुपूज्यजिनचरणे
रक्तदीप्तिरञ्जितनखशशधर-
जगदुद्भासिसुकिरणे....१
दीनतया भुवने गीतानां
भवभीतानां शरणे......२
इन्द्रियमत्तमतङ्गजपञ्चक-
वञ्चितभवदुद्धरणे.......३
विषयोन्मादप्रमादप्रेरित-
कर्माश्रवसंवरणे.........४
प्रक्षालितमलिनानन्तःकरणे
वारितपापाचरणे........५
दुष्टशीलतायाः संवरणे
चारुशीलताकरणे.......६



Jain Education International For Private & Personal Use Only www.jainelibrary.org

१३

## श्रीविमलनाथजिनगीतिः ॥

जय जय जय जय विमलजिनेश्वर!
तव गुणगानरसाकुलचेताः सञ्जातोऽतितमामविनश्वर!
विमलीकुरु मम हृत्कमलं हे नित्योदित! गतताप! दिनेश्वर!...१

बहुकालं सोढस्तव विरहो नाऽहमथोऽधिसहे परमेश्वर!
मोहध्वान्ताक्रान्तस्वान्त-स्तव विरहे वर्तेऽहं भास्वर!........२

क्षीरोदस्त्वं क्षारोदोऽहं कुशलस्त्वमहमनङ्कुशप्रष्ठः
स्थावरतुल्योऽहं त्वं स्थिरता-स्वामी हे जिन! नित्यविकस्वर!..३

त्वं सगुणः शिवरमणीसक्तः तदसक्तोऽहं निर्गुणपुरुषः
मम तव भेदमिमं बहुलघुकं लघु लघु निर्मूलय जगदीश्वर!....४

तव प्रेष्योऽहं प्रेषय मामथ निजगेहे जिन! प्रेषकशेखर!
करुणाशील! विगतभवलील! त्वमसि विभो! गतपील! जिनेश्वर..५



Jain Education International For Private & Personal Use Only www.jainelibrary.org

१४

# श्रीअनन्तनाथजिनगीतिः ॥

**श्रीअनन्त**मनन्तगुणाकर-मन्तकरं भवजलधे रे
स्तौम्यनन्तपदप्रापणसेतुं हेतुं सुगुणसमृद्धे रे........१

तव गुणसागरतो गुणमेकं छेकं गुणमय! देहि रे
रोरं मामथवा हे जिनवर! गुणचौरं प्रविधेहि रे.......२

उपदिष्टं भवतैव विभो! यद् 'दानं पात्रे देयं' रे
स्वयमेतन्नाऽऽचरसि तदत्र नु किं मयका विज्ञेयं रे?..३

चेदपात्रमस्म्यहकं भगवन्! तर्हि न याचे प्रचुरं र
पात्रत्वं त्वं मयि सम्पादय केवलममात्रमधुरं रे.......४

पात्रतया तव सेवन**शीलो** भवितुं नाथ! समीहे रे
वितर वितर करुणाकर! जिनवर! नाऽधिकमतोऽहमीहे रे...५



Jain Education International For Private & Personal Use Only www.jainelibrary.org

१५

# श्रीधर्मनाथजिनगीतिः ॥

स्वामिन्! कीदृगहं गुणरहितः ?

अभयदानमिह जीवनिकाये देयमवश्यं मुनिना

किन्त्वल्पामपि यतनां नाऽहं कुर्वे दानविरहितः ......१

मनसा वाचा क्रियया चाऽपि पाल्यं यतिना शीलम्

अस्खलितस्खलनाभिस्तदपि नु जातः शीलविरहितः ......२

अभ्यन्तरमथ बाह्यं च तपस्तप्यमेव ननु किन्तु

गलितबलीवर्दन्यायेनाऽभूवं तपसा रहितः ......३

भाव एव चारित्रप्राणा भावो धर्माधारः

किन्तु विभाववशेन मयाऽहं विहितो भावविरहितः ......४

मूलोत्तरगुणरहितोऽपि स्वं मन्ये हन्त सुविहितम्

दम्भदिग्धधिषणः को मादृक् स्यान्मम सृष्ट्यामहितः ......५

यद्यप्यगुणोऽस्म्येवं भगवन्! तदपि त्वयि, तव मार्गे

भक्तिरस्ति सुदृढा निष्कामा मम हृदि हे जनमहित! ......६

गुण एकोऽयं मयि चिरकालं विकसतु शतगुणशाखः

धर्मजिनेशाऽहं येनाऽऽशु गुणशीलः स्यां स्वहितः ......७



Jain Education International For Private & Personal Use Only www.jainelibrary.org

१६

# श्रीशान्तिनाथजिनगीतिः ॥

शान्तिप्रभो! शान्तिं कुरु
सर्वाशिवानि निराकुरु

भवदावशतशिखपावके बहुदग्धदेहोऽहं श्रये
करुणासुधाब्धिं त्वां द्रुतं शान्तिप्रभो! शान्तिं कुरु.....१

बहुदोषबब्बुलकण्टिकायां स्वं स्वयं प्रक्षिप्तवान्
उद्धर ततो मां पीडयाऽऽर्त्तं हे प्रभो! शान्तिं कुरु.......२

दुर्ध्यानदानवविकटवक्त्रे मस्तकं न्यस्तं मया
निहतोऽस्मि देव! सुरक्ष मां शान्तिप्रभो! शान्तिं कुरु...३

दुर्दम्यप्रसृमरसुमतिघस्मरस्मरविकारमहोदधौ
पतितो म्रिये तारय झटिति शान्तिप्रभो! शान्तिं कुरु....४

मम शमय दोषान् रमय मयि सुगुणान् विभो! करुणानिधे!
अथ दमय मम दुःशीलतां शान्तिप्रभो! शान्तिं कुरु....५



Jain Education International For Private & Personal Use Only www.jainelibrary.org

१७

# श्रीकुन्थुनाथजिनगीतिः ॥

कर्मपरिपन्थिनं कुन्थुनाथं जिनं विगतवृजिनं मुदाऽहं श्रयामि
चरणपङ्कजयुगं सेवमानोऽनघं दुरितपुञ्जं द्रुतं नाशयामि .........१

सेवना कर्तुमतिदुष्करा यद्यपि स्खलनरहितेति जानामि नाथ!
तदपि तत्रोद्यतस्तत्र खलु कारणं तीव्रश्रद्धैव किल भुवननाथ! ........२

कृतपरीक्षोऽहमितरेषु देवेषु वै तर्कगम्यं न तेषां स्वरूपम्
काचवच्चकचकन्मुग्धमेवाऽऽकृषद् दूरतस्त्यक्तनिजशुद्धरूपम्...३

पक्षपातं विना यदि परीक्षे विभो! बुद्धिसाङ्गत्यमङ्गसि तदा त्वम्
स्वपरशुद्धात्मरूपप्रकाशनपटु-र्नैव प्रतिभाति को जिन! विना त्वाम्...४

एवमिह तारतम्यं स्फुटं वीक्ष्य हे नाथ! तव चाऽपरेषाममानम्
सेवनां देव! नाऽहं प्रकुर्वे कथं सन्दधानस्त्वयि श्रद्दधानम्........५

सेवनापद्धतिर्विगलिताहंमतिर्विहितशरणागतिर्वसति चित्ते
यदि तदा शुद्धशीलं समनुभूय हे! स्थानमहमाप्नुयां देव हृदि ते.......६



Jain Education International For Private & Personal Use Only www.jainelibrary.org

१८

# श्रीअरनाथजिनगीतिः ॥

श्रीअर! निर्दय इह कस्त्वमिव ?
हन्ति निशितबाणैर्मां मदनापसदोऽकरुणमतीव
पश्यन्नपि मदुपेक्षां कुरुषे भुवनत्रातः! किमिव ?.......१

कारितवानपकृत्यश्रेणिं जाल्मोऽयं मम हस्तैः
असहायं मां निजदुष्कर्मा-यत्तं त्यजसि कथमिव ?....२

बुद्धि-शक्ति-गुण-धर्मविहीनोऽहं शल्यत्रयविद्धः
दण्डत्रिकदण्डितचेताः कः कृतकव्रती स्यादहमिव ?..३

दुर्गुणभरभरितोऽहं कामं तदपि त्वत्पदभक्तः
त्वं गुणाब्धिरपि भक्तोपेक्षी श्रेष्ठ आवयोः क इव ?....४

'जनतारक' इति बिरुदं तव यदि वाञ्छा सत्यापयितुम्
मादृशमधमं त्राणशील हे! तारय तर्हि तृणमिव .......५



Jain Education International For Private & Personal Use Only www.jainelibrary.org

१९

## श्रीमल्लिनाथजिनगीतिः ॥

वन्दे **मल्लिं** मङ्गलवल्लिं
मल्लिं विजितकामभरपल्लिं

घनकुचयुगभारावनताङ्गां विच्छायितरतिरङ्गाम्
मरकतमणिसन्निभछविचङ्गां पुनितामिव सुरगङ्गाम्......१

स्त्रीदेहेन न मोक्षावाप्ति-रिति सिद्धान्तितमितरैः
स्वीयार्हन्त्येनैव निरस्तं तत्रभवत्या तदरे! .......२

कुम्भनृपतिनन्दन! कुम्भाङ्कितपदपङ्कज! गुणकुम्भ!
भव्यानामतिकामकुम्भ हे! वर्षय मयि करुणाम्भः ......३

विशदशीलमण्डितनिजचरितैः प्रतिबोधितषड्भूपे!
**मल्लिस्वामिनि!** मां भवकूपा-दुद्धर शक्तिस्वरूपे! ....४



Jain Education International For Private & Personal Use Only www.jainelibrary.org

२०

# श्रीमुनिसुव्रतजिनगीतिः ॥

सेवे सततं सुव्रतदेवं
कोमलदृष्ट्या नाथ! निभालय
मां त्वत्पदकृतसेवम् .....
'सेवाधर्मः परमो गहनो '
गीयत इति नीतिज्ञैः
तदपि विलग्नं तव सेवायां
सह सह मां दृढहेवम् ...१
यद्यपि मयि नहि जिनपदसेवा-
पात्रत्वांशोऽप्यस्ति
'अविचारितकारी स्याद् बालो'
मन्ये किन्त्वहमेवं ......२
'घूणाक्षरनीत्या'ऽपि कृता जिन-
सेवाऽवश्यं फलति
इति मन्वानः कथमिव मुञ्च
करुणाशीलं देवम्?....३



Jain Education International For Private & Personal Use Only www.jainelibrary.org

२१

# श्रीनमिनाथजिनगीतिः ॥

अधुना नमिजिनचरणौ शरणं
अद्यावधि स्वच्छन्दतयाऽहं कृतवान् विभुविस्मरणम्...
निर्ध्वस्ताध्यवसायवशेनाऽऽदृतवानर्थकरणं
उन्मत्तेन च विहितं न मया हितवाक्यानां श्रवणम्......१
परमप्रसन्नोऽहमभूवं बत कृत्वाऽनिष्टाचरणं
दुर्गतिभीरपि स्पृशति न चित्तं कीदृग् मोहावरणम्!.....२
पापं पापत्वेन क्षणमपि क्वचिदपि कुरुते त्रसनं
चिन्तयामि धाष्टर्येन तदा जिन-कृतबहुदुष्टोद्धरणम्....३
कथदेवं हे तात! तवाऽग्रे स्वीयं स्वैरविहरणं
वर्णयामि लज्जास्पदमहकं श्रेष्ठमितः स्यान्मरणम्......४
पापत्यागे प्रथमं पदमिह जिनपदपङ्कजवरणं
अधुना दुरितत्रस्तो विदधे स्यान्मम भवसन्तरणम्.......५
आत्मसमर्पणमद्य विभो! तव - कुर्वे, कुरु स्वीकरणं
तव कृपया शुभशीलो भूत्वा मोक्ष्ये दुष्टाचरणम्........६



Jain Education International For Private & Personal Use Only www.jainelibrary.org

२२

# श्रीनेमिनाथजिनगीतिः ॥

भगवन्! हृदयं मेऽद्य विषण्णं
नेमिजिनेश्वरचरणासन्नं भ्रान्त्वा तत्तु निषण्णम्......
सर्वजनानुद्धारयसि त्वं पापात् संसाराच्च
ख्यातिमिति श्रुत्वा बहुजनतो जातं तदतिप्रसन्नम् ......१
आत्मोद्धारार्थं बद्ध्वाऽऽशां तत् त्वां तत आयातं
किन्तु न जाने केन हेतुना तत्कार्यमसम्पन्नम् ......२
पृच्छति तत् साक्रोशं किं मम 'भव्यत्वं नहि पक्वं ?
पापलीनता किं तीव्रा मे ? पुण्यं किमुत विपन्नम् ?' ......३
नेदं दृढप्रहारी नो वा-ऽर्जुनमाली न जमालिः
स्यादवगणना तस्य तदपि यदि तत् किं न स्यात् खिन्नम् ? ......४
पशवोऽप्युद्धरणीयाः स्वामिन्! तव चित्ते प्रतिभान्ति
'उद्धर्तव्यो नृपशुरयमपि' किमु तव मनसि न लग्नम् ? ......५
अथवा हृदय! विषादशीलतां त्यक्त्वा, धृत्वा धैर्यं
जिनपति-करुणावृष्टि-प्रतीक्षा-करणे तिष्ठ निमग्नम् ......६



Jain Education International For Private & Personal Use Only www.jainelibrary.org

२३

# श्रीपार्श्वनाथजिनगीतिः ॥

भवतः पार्श्वजिनो मां पातु
याचेऽहं कियदपि वरदानं कृपया मे स ददातु......
भवविस्तरणं जिनविस्मरणं द्वयमपि मम निर्वातु
अनिशं पार्श्वस्मृतिजलबलतः कर्ममलो मे यातु.....१
चिरविस्मृतनिजरूपस्मरणा-नुभवं शीघ्रं रातु
वीतरागदर्शनविरहो मम नहि नहि भवतु च जातु....२
तव चरणरजःकणभूषणमिह शिरसि सदा मम भातु
करुणाशील! तवैवाऽहं जिन! ओमिति मामाख्यातु..३



Jain Education International For Private & Personal Use Only www.jainelibrary.org

२४

# श्रीवर्धमानजिनगीतिः ॥

वन्दे वीरं गुणगम्भीरं
भववडवानलनीरं......
निष्कलमपि सकलं विकलङ्कं योगिवृन्दनासीरं
ध्यानगम्यरूपं जिनभूपं भवजलनिधिपरतीरम्.....१
वेधसमखिलसुमङ्गलसृष्टे-र्दुरितरजोऽणुसमीरं
लोकोत्तरशुभमेधसमुच्चैः कुमतिक्षितितलसीरम्...२
विषयपित्तशमनं दोषाणां दमनं ननु गोक्षीरं
चारुदीप्तिभासितजगतीतल-त्रिभुवनमस्तकहीरम्..३
प्रकटितशुचिमङ्गलनिजशीलं विघटितकर्मकरीरं
**वीरजिनेश्वर**महमतिधीरं वन्दे स्वर्णशरीरम्........४



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# कलशगीतिः

चेतन! चारु चारु कृतवांस्त्वं
चेतन! साधु साधु कृतवांस्त्वम्....
अतिमलिनोऽपि प्रभुगुणलीनः
क्षणमपि यज्जातस्त्वम्.......१
जिनगुणकीर्तनसुकृततरङ्गे
सर्वाङ्गं स्नातस्त्वम्..........२
परिणतिमेनां यदि रक्षिष्यसि
भुवि भविता ख्यातस्त्वम्.....३
समिति-समिति-गगनाऽक्षिमितेऽब्दे
सकलजिनान् स्तुतवांस्त्वम्...४
पौषशुक्लनवमीशुभदिवसे
जन्मफलं प्राप्तस्त्वम्..........५
धृत्वेदानीं शीलसप्तकं
कृतकृत्यो भूयास्त्वम्.........६



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# ॥ श्रीगौतमाष्टकम् ॥

-मुनिधर्मकीर्तिविजयः

गोबरनगरस्थाय वसुभूत्यन्वयश्रिये।
स्वामिने लब्धिकामिन्या **गौतम**गुरवे नमः ॥१॥
गुरुर्वाडववंशस्याऽशेषवेदान्तपारगः।
गर्वोन्मत्तो विजेतुं स आगतो निकषा विभुम् ॥२॥
त्रैशलेयस्य विश्रुत्य श्रोत्राभ्याममृतां गिरम्।
शिष्यीभूतः प्रशान्तः स दृष्ट्वा च मधुरं मुखम् ॥३॥
निर्माय द्वादशाङ्गीं च विधृत्य त्रिपदीं प्रभोः।
आदिगणधरो भूतः स विद्यासेवधिः सुधीः ॥४॥
सदेशशिवदेहिभ्यः स्मेरः केवलदीपकः।
**गौतम**गुरुणा दत्तः समीपे वसता विभोः ॥५॥
वीर! वीर! इति प्रोक्ते प्राप्तं वीरानुरागिणा।
विरागात् केवलं वीरात् गते वीरे शिवालये ॥६॥
सिद्धिजानिः कृपालुः स दग्धकर्मव्रजावलिः।
त्रिलोकशृङ्गमारूढः प्राप्तुकामः सुखश्रियम् ॥७॥
प्रशस्तकर्मभोक्ता च मनोवाञ्छितदायकः।
श्रीचिन्तामणितुल्यः स **गौतमः** श्रेयसेऽस्तु नः ॥८॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# ॥ परमगुरु-तातपाद-गीतिः ॥

-विजयशीलचन्द्रसूरिः

वन्दे नेमिसूरिमहाराजं
वन्दे जिनशासनसम्राजम्
जगद्वन्द्यचरणं शुभकरणं
मम शरणं गुरुराजम्......१

बाल्याद् ब्रह्मव्रतधरमनुपम-
मनिन्द्यचरितभ्राजम्......२

तपोगच्छगगनाभोगे किल
तिग्मदीप्ति-दिनराजम्.....३

परमार्थैककरणपटुकरणं
करुणाकरमव्याजम्.......४

तीर्थोद्धारैः स्वात्मोद्धारं
कृत्वा निजसुखभाजम्....५

सत्त्वशीलमुत्तमगुणलीलं
नाशितदोषसमाजम्.......६



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# ॥ गुरुवन्दना ॥

-मुनिधर्मकीर्तिविजय:

सुतेज:सम्पन्नं मधुरवदनं नेत्रयुगलं
कृपावृष्टिं वर्षद् गुरुगुणयुता गीश्च शुभदा ।
मुदा यस्याऽहं तं जिनवरमत-क्षेमनिरतं
गुरुं नेमिं सूरिं शुचिमतिनिधिं स्तौमि सुतराम् ॥१॥

(शिखरिणीवृत्तम्)

पूज्य: श्रीउदयाभिध: शममय: पूज्यं सदा संस्तुवे
पूज्येन प्रहतोऽशुभावलिचय: पूज्याय हस्ताञ्जलि: ।
पूज्याच्च प्रसृतं विधानममलं पूज्यस्य धैर्यं परं
पूज्ये निर्मलदर्शनं सुचरणं भो: पूज्य! सौख्यं कुरु ॥२॥

(शार्दूलविक्रीडितवृत्तम्)

प्रपञ्चमदवर्जितो निखिलसङ्घशान्तिप्रद:
परास्तरिपुसंहति: शमदमैस्तपोभिस्तथा ।
प्रचण्डमतिवैभवै: विजितवादिवृन्दारको
गुरुर्जयतु नन्दन: प्रवरसाधुसन्नायक: ॥३॥

(पृथ्वीवृत्तम्)



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# ॥ गुरुगुणगीतिः ॥

-विजयशीलचन्द्रसूरिः

वन्दे **नन्दनसूरिं** धन्यं
जन्मशताब्दीशुभवेलायां सकलसङ्घसन्मान्यम्....
सकलसदुपमापात्रममात्रं गुरुगुणमण्डितगात्रं
अनुभावयति नु यत्सान्निध्यं जङ्गमतीर्थमनन्यम्.........१
निर्दम्भं निर्दंशं निर्मलहृदयं वीतद्वेषं
परिणतप्रज्ञं गुण-गुणिरागाङ्कितमानसमजघन्यम्........ २
निज-परभेदविहीनमदीनं शासनसेवापीनं
गुर्वाज्ञाधीनं विबुधानां निवहे नितरां मान्यम्.......... ३
यत्स्वर्गारोहणभूमौ खलु **नन्दनवनसत्तीर्थं**
निर्मितवन्तो भक्तजनास्तं वन्दे गुरुमूर्धन्यम्........... ४
सम्यग्ज्ञानप्रदायक! गुरुवर! परमदयालो! भगवन्!
कुरु कुरु द्राक् शुभ**शील**सनाथं मामथ पशुमिव वन्यम्....५



Jain Education International For Private & Personal Use Only www.jainelibrary.org

परमपूज्यसङ्घनायकाचार्य-
श्रीविजयनन्दनसूरिभगवतां

# ॥ गुरुस्तुत्यष्टकम् ॥

-मुनिरत्नकीर्तिविजयः

अर्हच्छासनभास्करस्य महतः श्रीनेमिसूरिप्रभोः
संस्पर्शेन कृपाघृणेर्यदुदितं नित्यं गुणामोदयुक् ।
यत्र ज्ञानसुधारसार्थमनिशं भृङ्गायते सन्मनः
तं श्रीनन्दनसूरिराजविमलाब्जन्माऽहमद्याऽऽश्रये ॥१॥

सामीप्येन सुधाशनस्य सरितः सन्तापशान्तिर्यथा
सान्निध्यं हि तथा यदीयमसुमद्हृत्तापशान्तिप्रदम् ।
तद्वात्सल्यसुधापरीतममलं कारुण्यपूर्णं तथा
श्रीमन्नन्दनसूरिराजहृदयं भक्त्याऽऽश्रयेऽहं सदा ॥२॥

दर्शं दर्शमपांपतिर्निजसुतं पूर्णं ग्रहेशं यथा-
ऽऽनन्दावेशवशात् समुच्छलति यं राशिं गुणानां तथा ।
श्रीमन्नेमिगुरोर्हृदब्धिरतुलं दृष्ट्वा सदाऽऽह्लादते
तं श्रीनन्दनसूरिचन्द्रममलं नित्यं ह्युपासे त्रिधा ॥३॥

श्रीमन्नेमिगुरोः कृपाजलमुचो वृष्ट्या यदीया मति-
र्भूता पल्लविता जिनागमरहःपारज्ञता चाऽभवत् ।
एतादृङ् मतिमान् कदाग्रह-मद-व्याजादिमुक्तो महान्
यावच्चन्द्रदिवाकरौ जयतु स श्रीनन्दनः सूरिराट् ॥४॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

आमोदं वितनोति पुष्पनिवहो वर्षन्ति मेघास्तथा
ह्युद्योतं कुरुतेऽर्यमेन्दुयुगलं भेदं विना कुत्रचित्।
यस्यैवंविधवर्त्तनं हि सकले लोकेऽनुभूतं ध्रुवं
तस्य श्रीगुरुनन्दनस्य कृतिनः कुर्वेऽद्य भक्त्याऽर्चनम् ॥५॥

निश्रा यस्य रसालपादपसमा सन्तापशान्तिप्रदा
भूता सत्पथदर्शिनी शुभकरी सङ्घस्य भद्रङ्करी।
अर्हत्सङ्घहितैकभावितमतिः पुण्यौघसम्पद्युतो
जीयान्नन्दनसूरिराड् गुरुवरः श्रीसङ्घमुख्यश्चिरम् ॥६॥

धैर्यं स्मारयति क्षमाभृतमहो! गाम्भीर्यमप्यप्पतिं
ज्ञानं यस्य च दर्पमुक्तमनघं नम्रं फलाद्यैर्द्रुमम्।
इत्याद्युच्चगुणालिभिः जनमनोमोदप्रदाभिः सदा
ख्यातं श्रीगुरुनन्दनं व्रतिवरं वन्दे त्रिधा भावतः ॥७॥

"यस्याऽस्तीह न कोऽपि तस्य गुरुराट् श्रीनन्दनः सत्तमः"
लोके ख्यातिरितीव यस्य प्रथिता सर्वत्र पुण्योज्ज्वला ।
अद्याऽप्यत्र विराजतेऽक्षययशोदेहेन दीप्रेण यः
तस्य श्रीगुरुनन्दनस्य शरणं भक्त्या श्रये श्रेयसे ॥८॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

परमपूज्यानां शासनसम्राजां बालब्रह्मचारिणां
तपागच्छाधिपतीनां सूरिचक्रचक्रवर्तिनां
श्रीतातपादानां चरणयोः

# ॥ भावाञ्जलिः ॥

**-मुनिरत्नकीर्तिविजयः**

श्रीजिनशासनप्रासादस्याऽऽधारभूतानि त्रीणि तत्त्वानि सन्ति – देव-तत्त्वं गुरुतत्त्वं धर्मतत्त्वं च। यो मार्गदर्शकः स देवः, यो मार्गस्थः स गुरुः, देवेन च दर्शितः स्वरूपप्राप्तेर्मार्गो धर्म इत्युच्यते। एष तु महानुपकारो देवानां यत्तैः सन्मार्गो दर्शितः, किन्तु, तेषां साक्षादनुपस्थितौ तद्दर्शितमार्गस्य वोढारो गुरव एव। एतादृशां गुरूणामेकाऽविच्छिन्ना परम्परा श्रीमन्महावीर-भगवच्छासने प्रवर्तते। अस्या उज्ज्वल-परम्पराया आद्यगुरुवः श्रीसुधर्मस्वामिभगवन्त आसन्। तेषां पट्टपरम्परायां नैके महान्त आचार्या अभूवन्, यैरेकतो जिनमार्गोऽखण्डं प्रवर्तितोऽन्यतश्च स्वात्महितमपि सुसाधितमेव। अस्यामेव गुरुजनपरम्परायामाचार्य**श्रीमद्विजयनेमिसूरिभगवन्तो**-ऽस्य वैक्रमीयस्य विंशतितमशतकस्य प्रभावका धर्माचार्या अभवन्। तेषां महापुरुषाणां परिचयस्य चेष्टा तु गृहदीपेन भानोः परिचयप्रदानचेष्टेवाऽऽभाति। नाऽस्ति कोऽप्यस्मिन् जैनसङ्घे य एभ्यो महापुरुषेभ्योऽनभिज्ञः स्यात्।

वैक्रमीयनन्द-युग-नन्देन्दु(१९२९)वर्षे कार्तिकप्रतिपदि मधुमतीनगर्यां तेषां जन्माऽभवत्, तस्यामेव नगर्यामाश्विनकृष्णामावस्यायाः दीपालिपर्वणः रात्रावभवत्। अपरं च, जन्मदात्री माताऽपि दीवालीबाई ,अथ च स्वर्गारोहणदिवसोऽपि दीपालिरेव। तिष्ठन्तु दूरे ईदृश्यो बाह्या अपि कादाचित्क्यो घटनाः, किन्तु लघुवयस्यपि स्वयमेव गृहं परित्यज्य चारित्रं च गृहीत्वा स्वसामर्थ्या-देव या अपूर्वाः सिद्धीर्यच्चाऽनुपमवैशिष्ट्यं तैरात्मसात्कृतं तदेवाऽस्माकं तान् नमस्यितुं प्रेरयति। अथ तेषां गुरुभगवतां जीवनं सङ्क्षेपेण किञ्चिदवलोकयामः। परमगुरुभगवतां **श्रीवृद्धिचन्द्रा**-परनाम-**श्रीवृद्धिविजय**भगवतां पार्श्वे चारित्रं गृहीत्वा तेषामाज्ञानुसारेण चारित्रस्य



Jain Education International For Private & Personal Use Only www.jainelibrary.org

सन्निष्ठपालनं कृतं, गुरुभगवतामखण्डवैयावृत्त्येन च तेषां कृपाऽपि तैः सम्पादिता। अश्रान्तपरिश्रमपूर्वकं ज्ञानोपार्जनं कृतम्। अल्पेनैव कालेन स्वगुरुभगवतां चिरवियोगे जातेऽपि तेषामाज्ञामेव शिरस्यवधार्य स्वतन्त्रमपि सर्वत्र विहृतवन्तः। एतेन च यत्र ते पूज्या गतास्तत्र सर्वत्र जिनशासनस्य जयजयारवो-ऽभवन्। तैः पूज्यैरनेके तेजस्विनो मुमुक्षवः प्रतिबोध्य शिष्यत्वेन स्थापिताः, ये च समर्थाः शासनप्रभावकाः, प्रतिभासम्पन्ना विद्वांसो दृढसंयमाश्चाऽभवन्। तैर्गुरुभगवद्भिर्नैकेषु स्थानेषु पाठशालाः संस्थाप्य सम्यग्ज्ञानं प्रसारितम्। अन्यच्च ज्ञानकोशस्थापनया प्राक्तनं हस्तलिखितादि-साहित्यमपि सङ्गृह्य रक्षितं संवर्धितं च। जीवदया तु तेषां भगवतां प्राणभूताऽऽसीत्। अतस्तदर्थ-मपूर्वोद्यमेन नदी-समुद्रादितटस्थितान् धीवरान् प्रतिबोध्य मत्स्यपाशास्त्याजिताः। सौनिकगृहेभ्यो-ऽप्यनेकान् पशून् प्रतिनिवर्त्य तेषां रक्षण-पोषणादिव्यवस्थाऽपि कृता।

मातर-स्तम्भनक-सेरीसक-वामज-कापरडा-कदम्बगिरि-प्रमुखान्यनेकानि तीर्थस्थानानि तैः समुद्धृतानि। शत्रुञ्जयोज्जयन्त-सम्मेतशिखराद्यनेकतीर्थानां रक्षणार्थं सफलं प्रयतमानाः सन्तस्ते पूज्यगुरवः आणंदजीकल्याणजीसंस्थायाः पथप्रदर्शका अभवन्। स्वयमनेकग्रन्थानां रचना कृता शिष्यैश्च कारिता। श्रीहरिभद्रसूरिभगवतां कलिकालसर्वज्ञश्रीहेमचन्द्राचार्यभगवतां महोपाध्याय-श्रीयशोविजयभगवतां च ग्रन्थरत्नानि सम्पाद्य प्रकाश्य च श्रीसङ्घस्य साधना वेगवती कृता। अञ्जनशलाकाविधान-सिद्धचक्रपूजनाऽर्हद्महापूजनादीनां शासनमान्यानां विशिष्टानुष्ठानाना-मस्तङ्गता परम्पराऽपि पुनरुज्जीविता, तद्विधानपरम्परा च श्रीसङ्घे पुनः साम्नायं प्रस्थापिता। जिनागमाभ्यासानुज्ञाप्राप्तिरूपस्य श्रीयोगोद्वहनविधेर्विस्मृतपरम्पराऽपि तैरेव महापुरुषैः श्रीसङ्घे पुनः प्रवर्तिता। अत एव चाऽस्मिन् विंशतितमशतके विधिपूर्वकं गणि-पंन्यास-सूरिपदप्रापका त एवा-ऽदिमास्तपागच्छीया आचार्या अभवन्। अनेकभूपालान् प्रतिबोध्य तीर्थरक्षणजीवदया-प्रतिपालनादिसत्कार्याणि कारितानि। सङ्घादिषु च प्रसृतान् क्लेशानुपाशमयन्। वैक्रमीये शून्य-नन्द-निधीन्दु(१९९०)वर्षे श्रमणसम्मेलनस्याऽधिपत्यं स्वीकृत्य सकलः श्रीसङ्घः क्लेशान्निवारितः। एतादृक्षु सङ्घहितैकमतिषु महापुरुषेष्वपि केचिदसूयया प्रेरिता मत्सरिजना विद्वेषं व्यदधन्। तथाऽपि तादृशां तेषामापत्काले साहाय्यं प्रदाय परोपकारैकसारप्रवृत्तय



Jain Education International For Private & Personal Use Only www.jainelibrary.org

एते महात्मान: स्वस्यौदार्यं सर्वोपरित्वं महत्त्वं च सत्यापितवन्त:। एतादृशामनेकसत्कार्यै-र्दीप्यमानजीवनानां परमगुरुवराणां मुख्यवैशिष्ट्ये त्वेते यत् - ते बाल्यतोब्रह्मचर्यनिष्ठैकमतय: सिद्धवचनाश्चाऽऽसन्। संयम- परिपालनायां शिष्याणां चाऽनुशासने ते दृढा: सन्तोऽपि न कदाऽपि चारित्रचूडामणित्वेन स्वं ख्यापितवन्त:। किन्तु प्राक्कालीनमहापुरुषाणां चरणधूलितुल्यमेव स्वं तेऽमन्यन्त।

कदम्बगिरिसत्कै: ठक्कुरैस्तेषामुपदेशतो व्यसनानि त्यक्तानि। तद्भगवतामेतदुपकारं स्मृत्वा प्रत्यर्पणाय स्वकीया भावना यदा गुरुभगवतामग्रे प्रदर्शिता तदा समयज्ञैर्गुरुभगवद्भि: कदम्बगिरि-तीर्थोद्धारार्थं पर्वतोपरिस्थां तलहट्टिकायाश्च भूमिं आणंदजीकल्याणजीसंस्थायै विक्रेतुमुपदिष्टा। तदा तै: कथितं - " वयं तु भवद्भि: परिचिता: स्म:। अतो भवद्भ्य एव भूमिमुपायनीकरिष्याम:। संस्थायै अन्येभ्यो वा विक्रेतुं वयं न सम्मता:।" तदा गुरुभगवन्तोऽकथयन् -" साधूनां न कस्याऽप्युपायनस्वीकार: कल्पते।" तदा पुनस्तेऽजल्पन्- " जगद्गुरुश्रीहीरविजयसूरिभगवद्भ्यो-ऽकब्बरेणाऽपि श्रीशत्रुञ्जयतीर्थपट्टकमर्पितमेव। तच्च तै: पूज्यै: स्वीकृतमपि। अत: किं न भवा-नुररीकुरुतेऽस्माकं प्रस्तावम् ? भवद्वत् तेऽपि साधव एवाऽऽसन्। "

ईदृक्प्रत्युत्तरमाकर्ण्यगुरुभगवन्त आहु: -" पुण्यवन्त:! श्रीहीरविजयसूरिभगवांस्तु जगद्गुरु-रासीत्। अहं तु तेषां तुलनायां तुच्छोऽस्मि। तेषां चरणरज इव मे स्थानं वर्तते। तेषामनुकरणं तु नोचितं मम। "

जगद्गुरुश्रीहीरविजयसूरिभगवतामुदाहरणं पुरस्कृत्य स्वकीयामपि पूजां कारयतां यद्येतादृक् प्रत्युत्तरेणाऽपि नेत्रोन्मीलनं न भवेत् तदा तेषां मोहविजृम्भितमेव विचारणीयम्।

एते महान्त: सूरय: सकलसङ्घे '**शासनसम्राट्** ' इत्यभिधया प्रसिद्धा अभवन्। एतस्मिन्नेव विशेषणे उपर्युक्तसमस्तकथनस्य सार: समाविशति। इति शम्।

(आचार्य**श्रीविजयशीलचन्द्रसूरिमहाराज**-लिखितलेखानुसारेणानूदितम्।)



Jain Education International For Private & Personal Use Only www.jainelibrary.org

चरित्र कथा

# वात्सल्यनिधिः सङ्घनायकः

-मुनिकल्याणकीर्तिविजयः

सुज्ञाः प्राज्ञाः! सहृदयाश्च सुहृदः!

अद्य, जिनशासने निजगुरुचरणयोश्च स्वजीवनस्य प्रत्येकं क्षणं समर्प्य श्रमणसङ्घैक्याय देव-गुरु-धर्मस्वरूपश्रीजिनशासनोन्नत्यै च सर्वप्रकारैराजीवनं प्रयतमानानां, विनश्वरदेहं परित्यज्य दिवङ्गतानामपि निजासङ्ख्यगुणदेहेन सज्जनानां हृदये चिरं जीवतां, पूर्वपर्वतायमाने तपागच्छाधिपति-सूरिचक्रचक्रवर्ति-शासनसम्राडाशैशवशीलशालि-आचार्यमहाराजाधिराजश्रीविजय-**नेमिसूरीश्वरपट्टे** मार्तण्डायमानानामपि वात्सल्यामृतनिधीनां पूज्याचार्यश्रीविजय**नन्दनसूरीश्वराणां** जीवनं शब्दस्थयितुमुद्यतोऽहम्।

यद्यपि तदसङ्ख्यगुणान् वर्णयितुकामस्य ममाऽयं प्रयत्नः मेयपट्टिकां गृहीत्वा हिमगिरिं मातुकामस्येव जलगण्डूषैश्च सरित्पतिं पूरयितुकामस्येव भवतामुपहासास्पदं भवेत्। किञ्च निर्भाग्यशेखरायमाणेन मयैतत्पुण्यपुरुषदर्शनेन न पवित्रीकृते नेत्रे न कदाऽपि च तत्पादाम्बुजसेवया सफलीकृतोऽयं मनुजदेहः, तथाऽपि तेषां जीवनस्याऽन्तिमदशवर्षाणि तच्चरणेन्दीवरयोर्भृङ्गायितानां गुणैस्तत्प्रतिच्छायायितानां तैश्च स्वयमेवाऽध्यापितानां मदर्थं तु साक्षान्**नन्दनसूरीयमाणानां** मम पूज्यगुरुभगवतामाचार्यवर्यश्रीविजय**शीलचन्द्रसूरीश्वराणां** कृपामृतकूपात् प्राप्तेनैतत्सद्भूत-गुणामृतरसेन लब्धं श्रोत्रयोः साफल्यं, तल्लिखितश्रीविजय**नन्दनसूरि**चरितस्य पठनेन मननेन च नेत्र-मनांसि पवित्रितानि। अतस्तद्बलेनैव धाष्टर्यमालम्ब्यैतच्चरित्रलेशं वर्णयितुं प्रयासयन्नहं नोपालभ्यो भवद्भिरत्राऽसमञ्जसं च पुत्रापराधवन्मर्षयितव्यम्। यतः –

बालस्य यथा वचनं काहलमपि शोभते पितृसकाशे।
तद्वत् सज्जनमध्ये प्रलपितमपि सिद्धिमुपयाति ।

---



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अद्य समस्तं नगरं चित्रपताकाभिश्चारुतोरणैश्च शोभितमस्ति । राजमार्गा रथ्याश्च सम्यक् सम्मार्ज्य स्वच्छीकृताः सन्ति । दूरात् पटुपटहसहितस्य मङ्गलतूर्यस्य श्रुतिमधुरो ध्वनिः श्रूयते। किमर्थमेतत् सर्वम् ? अरे! अद्याऽखण्डब्रह्मतेजोदेदीप्यमानानां सूरिसम्राजामाचार्यश्रीविजय-**नेमिसूरीश्वराणां** नगरप्रवेशोऽस्ति । अतस्तत्स्वागतं कर्तुकामैः पूर्वासिभिरत्युत्साहेन नगरं सुशोभितं कृतमस्ति ।

सुन्दरोज्ज्वलनेपथ्याः सर्वे नागरा गुरुभगवतः पुरस्कर्तुं नगराद् बहिर्गतवन्तः। बधिरितदिगन्तेन जयजयशब्देन गुरुभगवतां स्वागतं कृत्वा तेषामग्रेसरत्वे सर्वे नगरस्थोपाश्रयं प्रति प्रस्थिताः। प्रतिगृहं श्रावक-श्राविका गुरुभगवतां पुरो गोधूमावलिं कृत्वा तान् विधिपूर्वं वन्दित्वा मुक्ताक्षतादिभिश्च वर्धापयन्ति स्म । ततश्च समुद्रगभीररवेण मङ्गलश्लोकं पठित्वा धर्मलाभाशिषं दत्त्वा च गुरवोऽग्रे प्रतिष्ठन्ते ।

इत्येवंविधां भव्यस्वागतयात्रां दृष्ट्वा तत्रस्थेनैकेन दशवर्षीयबालकेन विस्मयमुग्धकल्पनया स्वमनसि चिन्तितं यद् -“यद्यहमपि दीक्षां गृहीत्वाऽऽचार्योऽभविष्यस्तदा ममाऽप्येवंरीत्यैव स्वागतं बहुमानादिकं च भविष्यति । अतोऽहमपि दीक्षां ग्रहीष्यामि ।” अनेन चिन्तनेन तच्चित्ते यः संस्कार उद्बुद्धस्तत्संस्कारबलेनैव स बालोऽग्रे दीक्षां गृहीत्वा ततश्चाऽऽचार्यीभूया-ऽस्माकं समस्तश्रीसङ्घस्योदारचरितोनायकोऽप्यभवत् ।

का सा पूः? कः स बालः? कथं तेन दीक्षा गृहीता ?

कथङ्कारं च स आचार्यीभूय श्रीसङ्घनायकोऽभवत् ? एतान् विकल्पान् शमयितुं पठतैतच्चरित्रम् ।

अस्ति किल सौराष्ट्रदेशमण्डनं विश्रुतराष्ट्रकविश्रीझवेरचन्द्रमेघाणी-कविप्रकाण्ड-श्रीबोटादकरादिकवीनामाकरं शौर्यौदार्यादिगुणालङ्कृतैर्धार्मिकैर्नीतिनिपुणैश्च जनैर्व्याप्तं **बोटाद**-इतिनामकं नगरम् ।

तत्र स्वकीयधैर्यौदार्य-शौर्य-नय-सन्तोषादिगुणैः समग्रनगरे सिंहतया विश्रुतः **श्रीहेमचन्द**-नामा वणिक्श्रेष्ठी वसति स्म । स कार्पासतूलिका-व्यापारेण यथार्त्तु चाऽन्यद्रव्यव्यवहारेण



Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्ववृत्तिं निरवाहयत् । शील-लज्जा-विनयादिगुणैर्भूषिता **यमुना** नाम तद्भार्याऽऽसीत् । तयोश्च त्रयः पुत्रा जाताः । ज्येष्ठः **सुखलालः**, मध्यमो **हरगोविन्दः** कनीयांश्च **नरोत्तमः** । स एवाऽस्माकं चरित्रनायकः । वैक्रमीये बाण-विशिख-निधि-निशाकरमिते(१९५५) वर्षे कार्तिकशुक्लैकादश्यां तस्य जन्माऽभूत् ।

सुसंस्कारिणी माता निजपुत्रान् संस्कारिणो गुणवतश्च कर्तुं सदैवोद्यताऽऽसीत् । अतो बाल्यादेव नरोत्तमो वृद्धबहुमानी ग्लानादिसेवातत्परः विनयी परोपकारव्यसनी पित्रोश्चाऽऽज्ञापालकोऽभवत् । पितुश्चोत्तमसंस्कारैः धीरः साहसिको निर्भयश्चाऽभूत् । जिनदर्शन-पूजन-गुरुवन्दन-सुपात्रदानमुख्यान् निजपरिवारगतान् धार्मिकसंस्कारानपि स स्वायत्तीकृतवान् ।

स्वीयप्राथमिकाध्ययनं गूर्जरभाषायां कृत्वा नरोत्तमेनाऽऽङ्ग्लभाषायाश्चतस्रः श्रेणय उत्तीर्णाः, पाठशालायां च धार्मिकमध्ययनमपि कृतम् । तीव्रग्रहणशक्तेः दृढस्मृतेः कुशाग्रबुद्धेश्च स्वामित्वात् सर्वत्राऽध्ययने स सदैवाऽऽग्रेसरायत ।

किञ्च सूरिसम्राजां स्वागतयात्रायां योऽव्यक्तः संस्कारस्तस्य मनस्युद्बुद्धः सोऽप्यनुदिनं वरीवृध्यते स्म । ततः स प्रतिदिनमुपाश्रयं गत्वा गुरुभगवतां यथाशक्ति परिचर्यां वैयावृत्त्यादिकं च करोति, गोचरचर्यायां पुरे निर्गतांस्तान् सोल्लासं श्रावकगृहाणि दर्शयति सूरिसम्राजां च व्याख्यानं सदैवाऽनन्यचित्तीभूय शृणोति । रात्रावपि स नित्यमुपाश्रयं गत्वा सूरिसम्राजां विश्रामणादि करोति । एकदाऽऽहारग्रहणार्थं तद्गृहमागतेन श्रीप्रभावविजयाख्येन मुनिना गृह-निःश्रेण्यामेव स पृष्टः - "रे बाल! किं त्वं दीक्षां ग्रहीष्यसि ?"

तेनोक्तं - "अवश्यं ग्रहीष्यामि ।"

मुनिरवक् - "भो! तव पितरौ त्वन्मस्तकं स्फोटयिष्यतः । "

तदा तेन कथितं - " किमपि भवतु । नाऽहं ततो बिभेमि । "

अन्यदा सूरिसम्राजस्तमपृच्छन् - " कस्य पुत्रस्त्वं बाल! ? "

स आह - " भगवन् ! हेमचन्द्रश्रेष्ठिनः पुत्रोऽहम् ।"

तच्छ्रुत्वा किमपि नोक्त्वा तैस्तस्य हस्तरेखा दृष्टाः, ततश्च किञ्चिद्विचिन्त्य स विसृष्टः ।

इतो वैक्रमीये रस-रस-ग्रहेन्दुमिते (१९६६) तस्मिन् वर्षे सूरिसम्राड्भिः सपरिवारैर्बोटादनगरे



Jain Education International For Private & Personal Use Only www.jainelibrary.org

चतुर्मासी गमिता। तस्यां चतुर्मास्यां गुरुभगवतां नित्यपरिचयेन परिचर्या-शुश्रूषादिभिश्च नरोत्तमचित्ते तदव्यक्तसंस्कारबीजस्याऽङ्कुराः प्रास्फुटन्। ततश्च तेन दीक्षार्थं प्रयत्ना आरब्धाः। तेन स्वमनसि दृढनिश्चयः कृतो, यद् 'दीक्षाऽङ्गीकर्तव्यैव साऽपि सूरिसम्राट्पार्श्व एव,नाऽन्यत्र।' बोटादनगरे देसाइपरिवारजो **अमृतलाल**नामा किशोरः सूरिसम्राट्पार्श्व एव दीक्षितुकाम आसीत्। तेन सह नरोत्तमस्य सौहार्दमभवत्। ततस्तौ द्वावपि मिलित्वा दीक्षाग्रहणोपायानचिन्तयताम्।

इतश्च तत्रैव नगरे विदुषीसाध्वीश्रीसुमतिश्रियः शिष्यैका साध्वी विश्रुतवैद्यप्रकाण्डश्री-ईश्वरभट्टपार्श्वे विजयप्रशस्तिमहाकाव्यमध्येतुमवसत्। तस्या अतीव वल्लभत्वात् तत्सर्वकार्याणि नरोत्तमोऽकरोत्, स्वमनस्युदितांश्च दीक्षादिविषयान् सर्वानपि विचारान् सदैव तामकथयत्। अत एकदा तया स उक्तो यद् "दीक्षां गृहीत्वा त्वं विद्वद्वरेण्यश्री**उदयविजय**महाराजस्यैव शिष्यो भूयाः।" तदा तेनाऽपि तस्यां स्वमातरीव पूर्णश्रद्धया तत्स्वीकृतम्।

किञ्चैतत्तु निश्चितमेवाऽऽसीत् " यद् स्वगृहे दीक्षावार्ताया उच्चारणमपि दुःशकमतस्तदर्थं पित्रोः सकाशादनुमतिराकाशकुसुमवदलभ्या।"अतस्तेन निर्णीतं यद् "दीक्षायाः श्रेष्ठ उपायः पलायनमेव।"

अतः सर्वप्रथमं तेन सूरिसम्राजां शुद्धिं लब्धुं प्रयत्ना आरब्धाः। अनेकैः प्रयत्नैः स ज्ञातवान्, यदधुना ते चातुर्मासार्थं कर्पटवाणिज्यनगरे विराजन्ते। ततः स तस्यामेव रात्रौ युक्त्या पलाय्य येन केन प्रकारेण कर्पटवाणिज्यनगरं प्राप्तः। तत्रोपाश्रयं गत्वा सूरिसम्राजोऽवन्दत। तं दृष्ट्वा विस्मयापन्नैस्तैः पृष्टः स -"भोस्त्वं कथङ्कारमत्रागतः?" तेनाऽपि यथावृत्तं निवेद्योक्तं- " अहं दीक्षितुमिच्छामि।"

तच्छ्रुत्वा द्रुतमेव गुरुभिः स वाडीलालनामकश्रावकेण सह बोटादनगरं प्रेषितः। सोऽपि तेषामादेशं शिरसि धारयित्वा गतः। कतिपयदिनानन्तरं स पुनरपि गृहात् पलाय्य कर्पटवाणिज्यं प्राप्तः। तं दृष्ट्वा प्रसन्नैर्गुरुभगवद्भिस्तेन बोटादनगरे तत्समाचारं ज्ञापयितुं पत्रं लेखितं यद् "अहं कर्पटवाणिज्यनगरे श्रीसूरिसम्राडन्तिकमागतोऽस्मि, ततो भवद्भिश्चिन्ता न कार्येति।" तदनन्तरं बोटादादपि प्रत्युत्तरमागतम्। दीपावलीदिनेषु मुम्बापुर्या निवर्तमानो हेमचन्द्रश्रेष्ठी तत्राऽऽगत्य नरोत्तमं बोटादनगरमनयत्। गृहं प्राप्तः स केनाऽपि स्वजनेननोपालब्धोऽतः सोऽतीवशान्तिं



Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रापत्।

पुनरप्यवसरं लब्ध्वा स पलायितः। पित्रा च गृहमानीतः। एवं वारं वारं तत्पलायनेन चकितः पिताऽन्यदा तमपृच्छत् - "भो नरोत्तम! किमिति त्वं वारं वारं पलायसे ? किं चिकीर्षसि त्वम् ?" पितुः समक्षं सत्यं भाषितुमक्षमेण तेना तदाऽलीकमेवोक्तं - "अहं महेसाणानगरस्थ-पाठशालां गत्वा पिपठिषुरस्मि।"

"अहो! तर्हि किमर्थं पलायितव्यम् ? गच्छ त्वम्। न तत्राऽस्माकं कोऽपि बाधः।" एवं भणित्वा पित्रा ज्येष्ठपुत्रसुखलालेन सह स तत्र प्रेषितः। सुखलालोऽपि तं महेसाणानगरं नीत्वा पाठशालायां निवेशितवान्। प्रतिनिवर्तमानेन तेन रहसि सर्वेऽध्यापकाः कर्मचारिणश्च तत्पलायन-वृत्तान्तं ज्ञापिताः सावधानीभवितुं च विज्ञप्ताः।

तस्मिन् गते नरोत्तमोऽपि पलायानावसरं मार्गयति स्म। कुतोऽपि तेन ज्ञातं यदधुना सूरिसम्राजोऽहमदाबादनगरे विराजन्ते। अत एकादशे दिने तेनऽहमदाबादे वाडीलालश्रावकोपरि पत्रं लिखित्वा ज्ञापितं यद् 'अहममुकदिनेऽहमदाबादमागमिष्यामीति।' ततः पाठशालास्थाध्यापक श्रीत्रिभुवनदासाय कथितं यद् "अहमहमदाबादं जिगमिषुरतो मे तद्गमनोचितं मूल्यं देहि।" अध्यापकेन त्रीण्याणकानि दत्त्वाऽधिकं निषिद्धम्। मूल्यं तु पादोनाष्टाणकान्यासीत्। नरोत्तमपार्श्वेऽपि त्रीण्याणकान्यासन्। अन्याश्च पत्रप्रेषणोचिताः काश्चित् पत्रिका(स्टेम्प्स) अपि आसन्। ताः कस्मैचिद्दत्त्वा ततः प्रति शेषं धनं लब्धम्। ततस्त्रिभुवनदासात् स्वकीयां वस्त्रादिसामग्रीं गृहीत्वा स ततो निर्गतः। त्रिभुवनदासेनाऽन्यकर्मचारिभ्योऽस्य गमनवृत्तान्तः कथितः किन्तु तत्सद्भाग्येन न केनाऽपि तत्प्रति लक्ष्यं दत्तम्।

सोऽपि सत्वरमहमदाबादमभिगच्छन्तमग्नियानमारुह्याऽहमदाबादं प्राप्तः। ततो वाडीलाल-प्रेषितसेवकेन सह पांजरापोळस्थोपाश्रयं गतः। सूरिसम्राजस्तदानीं तत्र विराजन्ते स्म। तान् वन्दित्वा तैः पृष्टेननरोत्तमेन यथातथं स्ववृत्तं निवेदितम्। तच्छ्रुत्वा गुरुभिः प्रधानश्रावकानाहूय तद्वृत्तान्तं ज्ञापयित्वा तदर्थे किंकर्तव्यं पृष्टम्। तैरपि विचिन्त्य कथितं -

"भगवन्! यद्ययं प्रबलभावनावांस्तर्ह्येतस्मायवश्यं दीक्षा देया। पश्चाद् यत्कर्तव्यं तत् करिष्यामः।"



Jain Education International For Private & Personal Use Only www.jainelibrary.org

गुरुभिरुक्तं - " नाऽहमेवंरीत्याऽस्मै दीक्षां दित्सुः। इतोऽप्येनं क्वचिदन्यत्रैव प्रेषयिष्यामि। अत्र तु नैव स्थापयामि। "

एवं तैः सह विमृश्याऽन्यदिन एव मुनिश्रीप्रभावविजय-जीतविजयाभ्यां सह स गोधरानगरं प्रति प्रस्थापितः। ते प्रथमदिने रायपुरग्राम उषित्वा द्वितीयदिने वलादग्रामं प्राप्ताः। तत्र प्राप्तमात्रमेव नरोत्तमेन मुनिश्रीप्रभावविजयाय विज्ञप्तं - " भवानद्य मह्यं दीक्षां ददातु।" श्रीप्रभावविजयेन निषिद्धं यद् - "गुरुभगवतामियमाज्ञा यन्मामनापृच्छ्य ते दीक्षा न देया।"
तेनाऽप्यत्याग्रहं कृत्वा पुनरपि विज्ञप्तं - " मेऽद्यैव दीक्षां देहि। पश्चाद् यद् भविष्यति तत् सर्वमहमेव सम्भालयिष्यमि।"

तस्योल्लासं दृष्ट्वोत्साहयुक्तेन मुनिना तद्वचनं स्वीकृत्योपाश्रय एव जिनप्रतिमां स्थापयित्वा दीक्षाविधिरारब्धः। अत्राऽन्तरेऽहमदाबादतो गुरुभिस्तत्रत्यवृत्तं ज्ञातुं प्रेषितो नर आगतः। तेनाऽऽनीतं गुरुभगवतां पत्रं सद्भाग्येन नरोत्तमायैव दत्तम्। पत्रे दीक्षावार्ताऽपि निषिद्धाऽऽसीत्। तत् पठित्वा नरोत्तमेन सङ्गोपितम्। ततो दीक्षाविधिरारब्धः। वैक्रमीयस्य ख-मुनि-निधि-सोम-मितवर्षस्य (१९७०) माघमासस्य शुक्लद्वितीयादिने दीक्षितस्य नरोत्तमस्य नाम **मुनिनन्दनविजये**ति स्थापितम्। क्रियावसाने तेन स्वयमेव पत्रे लिखितं, 'यन्मयाऽद्य दीक्षा गृहीता। अतोऽन्यं साधुभगवन्तमत्र गमयेत।' तच्च दत्त्वा ऽऽगतं जनमहमदाबादं प्रेषितवान्।

दीक्षासमाचारं ज्ञात्वा विस्मितैर्गुरुभगवद्भिः पंन्यासश्रीप्रतापविजयगणिवरास्तत्र प्रेषिताः। ततस्ते चत्वारोऽपि मुनयो विहृत्य द्रुतमेव गोधरानगरं प्राप्ताः।

दिनद्वयं तत्र स्थित्वा त्वरितगत्या मालवप्रदेशं प्रति प्रस्थिताः। तद्वर्षे तै राजगढनगरे चातुर्मासं कृतम्। अथाऽन्यदा मुनिनन्दनविजयं विना त्रयोऽपि मुनयो ग्लानीभूताः। तदा 'व्याख्यानं को वाचयेत्?' इति चिन्तयता पं.श्रीप्रतापविजयेन नूतनमुनये पृष्टम् -" किं त्वं व्याख्यानं वाचयसि?" तेनाऽपि सोत्साहं स्वीकृतं तत्। ततस्तेन **वर्धमानदेशना**भिधो ग्रन्थो जनसमक्षं व्याख्यातुमारब्धः, रुचिरतया व्याख्यातश्च। नूनं " किमसाध्यं महात्मानम्?"

इतो महेसाणानगरस्थपाठशालाया अध्यापकेन कर्मचारिभिश्च नरोत्तमपलायनवृत्तान्तो बोटादनगरे तत्पित्रादिभ्यो ज्ञापितः। तज्ज्ञातमात्रमेव पितृ-भ्रात्रादयः सर्वे स्वजनाः सम्भूय येन



Jain Education International For Private & Personal Use Only www.jainelibrary.org

केन प्रकारेण तमानेतुमहमदाबादनगरं गन्तुमुद्यता: । किन्तु तज्जनन्या स्पष्टतया कथितं यद् "यदि तेन दीक्षा गृहीता तर्हि तमङ्गुल्याऽपि मा स्पार्ष्ट, यद्यदीक्षितस्तर्हि यथाकथमपि तं गृहमानयत ।" तद्वचनं स्वीकृत्य सर्वेऽप्यहमदाबादनगरे सूरिसम्राट्पार्श्वमागता: । आगत्यमात्रं तै: परुषभाषया यत्तत् प्रलप्य पृष्टं - " कुत्राऽस्माकं नरोत्तम:? अद्यैव नो ददातु ।"

गुरुभगवन्तोऽवदन् -" यद्यत्र स्यात् तर्हि विलोक्य तं नयत । "

तै: सर्वत उपाश्रय: शोधित:, किन्तु कुत्राऽपि न लब्धस्तद्गन्धोऽपि । ततो गुरुभिस्ते सर्वेऽप्याश्वासिता यत्-"सोऽत्र नास्त्येव, किन्तु यदाकदाऽपि मत्पार्श्वमागच्छेत् तदाऽहं सर्वप्रथमं युष्माकमेव ज्ञापयिष्यामि । ततो यूयं यच्चिकीर्षथ तत्कुरुत । "

तच्छ्रुत्वा विश्वस्ता: सर्वे स्वस्थानं प्राप्ता: ।

किन्त्वाशङ्कितो ज्येष्ठभ्राता सुखलालस्तच्छुद्धिं लब्धुं सर्वत्र मृगयमाणो भ्रामं भ्रामं कालिकाता-नगरं प्राप्त: । तत्र जिनालये जिनपूजां कृत्वा समीपस्थोपाश्रये गुरून् वन्दितुं गत: । तदानीं तत्राऽग्नियानविहारी श्रीशान्तिविजयाख्यो यतिरासीत् । सुखलालेन विधिपूर्वकं स वन्दित: । तदा मुनिना -" कुतस्त्यो भवान् ? " इति पृष्टे - " बोटादनगरवास्तव्योऽहम् । " इति तेन प्रत्युक्तम् । " किंनिमित्तमत्राऽऽगमनम् ?" इति पुनरपि मुनिना पृष्टे तेनोक्तं -"कुत्राऽपि गतस्य कनीयसो भ्रातु: शुद्धीकर्तुं भ्राम्यामि । न जाने क्व लप्स्यते ? "

तच्छ्रुत्वा ज्योति:शास्त्राभ्यासिना तेन यतिना प्रश्नकुण्डलिकामुपयुज्य कथितं -" तव भ्राता दीक्षितोऽस्ति । स च द्वादशमासपूर्वं न लप्स्यते त्वया । अतो मा कार्षीश्चिन्ताम् ।"

सुखलालोऽप्यनायासमेव तद्वचनं श्रद्धाय शोधनं मुक्त्वा गृहं प्रतिनिवृत्त: ।

इतश्च चतुर्मास्यां पूर्णायां वैक्रमीयसोम-ऋषि-निधि-एकमिते (१९७१) वर्षे मुनिनन्दनविजयसहिता: पंन्यासश्रीप्रतापविजयादयो मुनिवरा राजगढतो विहृत्य मारवाडप्रदेशं प्राप्ता: । अहमदाबादतोऽपि सपरिवारा: सूरिसम्राजो विहृत्य मारवाडप्रदेशस्थसादडीग्राममागता: । तज्ज्ञात्वा सर्वेऽपि पंन्यासश्रीप्रतापविजयादय: सत्वरं सादडीग्राममागच्छन् । तत: सूरिसम्राड्भिर्बोटादनगर एतत्समाचार: प्रेषित: । अत: मातापित्रादय: सर्वे स्वजना: द्रुतं सादडीग्राममागता: । तत्र मुनिनन्दनविजयतया परावृत्तं स्वपुत्रं वीक्ष्य पित्रैतावदेवोक्तं यद् -" अहं बोटादनगरे



Jain Education International For Private & Personal Use Only www.jainelibrary.org

सिंहतया विश्रुतोऽस्मि। मत्पुत्रेण च त्वया दीक्षा गृहीता। अतस्त्वं सिंहपुत्रायमाणः सिंहवद्दीक्षां पालयेति मेऽभिलाषः।"

तदाकर्ण्य प्रसन्नहृदयेन मुनिनन्दनविजयेनाऽपि सानन्दं तदाशीर्वचोऽङ्गीकृतम्।

तदनु मुनिनन्दनविजयो बहिर्वज्रायमाणानामप्यन्तः शिरीषकुसुमायमानानां भीमकान्तहृदां परमगुरुश्रीसूरिसम्राजां पावनसान्निध्ये स्वयंस्फूर्त्या च गभीराध्ययने, चारुचारित्रपालने, सुयोग्य-तपसि, गुरुसेवायां, विनयादिगुणसाधने चाऽप्रमत्ततया प्रावर्त्तत। तीव्रमेधाबलेन व्याकरण-न्याय-जैनसिद्धान्तादीनां प्राथमिकं ज्ञानं शीघ्रं लब्ध्वा तद्वर्ष एव संस्कृत-प्राकृतग्रन्थास्तेन स्वयमेव पठितुमारब्धाः।

वैक्रमीये सोम-ऋषि-निधि-एकमिते (१९७१) वर्षे सूरिसम्राड्भिर्जावालनगरे वैक्रमीये युग्म-मुनि-निधीन्दु-मिते (१९७२) वर्षे च सादडीग्रामे चतुर्मासी गमिता। तत्र निजदीक्षाया-स्तृतीय एव वर्षे स्वीयाप्रतिमप्रतिभां प्रकाशयता तेन तीर्थकर-गणधर-गुरुवर्यादीनां स्तुतिमयो नानाच्छन्दोनिबद्धः **स्तोत्रभानु**नामग्रन्थो रचयित्वा सूरिसम्राजां करकमलयोः समर्पितः। तं दृष्ट्वाऽतीवप्रसन्नैः सूरिसम्राड्भिः सत्वरं स ग्रन्थः श्रीजैनप्रकाशकसभाद्वारा मुद्रणं प्रापितः।

अन्यदा वैक्रमीयसोम-ऋषि-निधि-भुवनमिते(१९७३) वर्षे फलवृद्धि-नगरे चतुर्मास्यां गुरुभगवद्भिः पृष्टं - "नन्दन! किं त्वं प्रवचनं करिष्यसि ?"

" अवश्यं प्रभो! किन्तु किं व्याख्यायाम् ? " इति निर्भीकशेखरेण तेन निर्दोषतया पृष्टे, पूज्यैरपि लक्ष्मीवल्लभीवृत्त्यलङ्कृतमुत्तराध्ययनसूत्रं व्याख्यातुमादिष्टम्। तेनाऽपि 'तथे'ति स्वीकृत्य पञ्चदश दिवसान् तदुपरि प्रवचनं कृतम्।

तत्रैव वर्षे पयुर्षणायां "नन्दन! कल्पसूत्रस्य कतमं क्षणं व्याख्यास्यसी" ति पृष्टे तेन "प्रभो! प्रथमं क्षणं" इत्युक्तम्। तदा, सदा स्वयमेव प्रथमं क्षणं वाचयद्भिरपि तदुत्साहं दृष्ट्वा प्रसन्नचित्तैः सूरिसम्राड्भिर्नन्दनविजयेन प्रथमः क्षणो व्याख्यापितः।

एवं तस्याऽनन्योत्साहं, विनयान्वितामध्ययननिष्ठां, विवेकपूतमाचरणं निर्व्याजं च गुरुसमर्पणं दृष्ट्वा मुदितमानसैर्गुरुभगवद्भिश्चिन्तितं यद् -" अयं मे सुयोग्यः शिष्यः, अत एनं सत्वरं पाठयित्वा जिनशासनधुरीणं करोमि।"



Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततश्च पूज्यसूरिसम्राजां संस्कृतवाङ्मयाचार्यश्रीशशिनाथझाभिधपण्डितवरेण्यस्य च समीपेऽधीयानेन मुनिनन्दनविजयेन व्याकरण-न्याय-वैशेषिक- मीमांसा-साङ्ख्य-वेदान्त-पातञ्जलादिदर्शनानां जैनदर्शनस्य च नैके मूर्धन्यग्रन्था अधीताः।

तत्र केषाञ्चिन्नामान्येतानि - **न्याय-वैशेषिकयोः** - तर्कसङ्ग्रहः, दिनकरी-रामरुद्री-संवलिता सिद्धान्तमुक्तावली, व्याप्तिपञ्चकं, सिंहव्याघ्रलक्षणं, सिद्धान्तलक्षणं, अवच्छेदकत्व-निरुक्तिः, सव्यभिचारप्रकरणं, प्रशस्तपादभाष्यं, न्यायकुसुमाञ्जलिः, लक्षणावली, आत्मतत्त्वविवेक इत्याद्याः;

**वेदान्ते** - पञ्चदशी, वेदान्तपरिभाषा-शिखामणिः, अद्वैतसिद्धिः;

**साङ्ख्ये** - साङ्ख्यकारिका, तत्त्वकौमुदी, लौगाक्षिभास्करकृतः अर्थसङ्ग्रहः, पातञ्जलयोग-सूत्रवृत्तिः, श्रीहर्षविरचितं खण्डखण्डनखाद्यं;

**व्याकरणे** - सारस्वतव्याकरणं, सिद्धहैमव्याकरणं, नागेशभट्टस्य मञ्जूषा;

**साहित्ये** - साहित्यदर्पणं, कुवलयानन्दादयः;

**काव्ये** - रघुवंश-किराताद्याः;

**जैनदर्शने** - जैनतर्कभाषा, स्याद्वादमञ्जरी, प्रमाणनयतत्त्वालोकः, अष्टकप्रकरणं, न्यायालोकः, सप्तभङ्गीतरङ्गिणी, अष्टसहस्री, सन्मतितर्कः, षड्दर्शनसमुच्चयः, न्यायखण्डखाद्य इत्याद्या अनेके मूर्धन्या ग्रन्थाः।

एतेष्वपि केचिदेव पण्डितवर्यान्तिकेऽधीताः। अन्ये तु स्वयमेव पठिताः।

सिद्धान्तमुक्तावली, सारस्वतचन्द्रिका च साद्यन्तं कण्ठस्थीकृता।

अन्यच्चैतान् ग्रन्थान् पठता '**ग्रन्थस्य ग्रन्थान्तरं टीके**'ति न्यायात् तत्सदृशविषया अन्येऽपि बहवो ग्रन्था अवगाहिताः। यथा साहित्यदर्पणं पठता रसगङ्गाधर-काव्यप्रकाशाद्या महाग्रन्था अवगाहिताः।

दर्शनविषयकग्रन्थान् पठता तेन कर्मसाहित्यस्याऽऽगमसाहित्यस्याऽपि गभीरमध्ययनं कृतम्। तत्र चत्वारो नव्यकर्मग्रन्थाः सटीकाः श्रावकपण्डितवर्यश्रीहीरालालपार्श्वेऽधीताः। अन्यत् सर्वमपि प्राचीनं नव्यं च कर्मसाहित्यं स्वयमेवाऽधीतम्। कर्मप्रकृति(कम्मपयडी)स्तु ग्रामानुग्रामं



Jain Education International For Private & Personal Use Only www.jainelibrary.org

विहरता रात्रौ चन्द्रप्रकाशे पठिता। अत्र विषये तेन तथा तलस्पर्शि ज्ञानं लब्धं यथा तदात्वे न कोऽपि साधुस्तत्प्रतिस्पर्धी आसीत्।

आगमवाचनमपि प्रायस्तेन स्वयमेव कृतम्। यदा यस्याऽऽगमस्य योगोद्वहनं कृतं तद्वाचनमपि प्रायस्तदैव कृतम्। एवं सवृत्तयः पञ्चचत्वारिंशदागमास्तद्विषयकं चाऽन्यत्सर्वमपि साहित्यमधीतम्।

किञ्च निजं सर्वमप्यध्ययनं तेनाऽतीवैकाग्रतया तन्मयीभावेन च कृतं, अधीतविषयाणां च रहस्यं बोद्धुमपारःप्रयत्नः कृतः। तेन यत्किमपि तदध्ययनविषयीभूतं तस्य सर्वस्य सारभागो निजमानसपट अङ्कित इव तेनाऽऽजीवनं न विस्मृतः। आगमपाठा वा कर्मसिद्धान्ता वा न्यायपदार्था वा व्याकरणांशा वा साहित्यालङ्कारयोरसङ्ख्यश्लोका वा, सर्वेऽपि तज्जिह्वाग्रे एवाऽवसन्।

किं बहुना? तावति लघुवयसि तावताऽल्पकालेन च मुनिजीवनस्य कठोराचारान् पालयता नाना कष्टानि सहमानेन च तेनाऽनवरतप्रयत्नैर्यज्ज्ञानं लब्धं तदस्मादृशामैदंयुगीनानां हीनसत्त्वानां तु कल्पनातिगमेव।

एतादृक्षं गहनं ज्ञानार्जनं निर्मलं चारित्रपालनं च कुर्वताऽपि तेन स्वकीयं मूलकर्तव्यंगुरुभक्तिस्तु न कदाऽपि विस्मृता। सूरिसम्राजां मुखान्निर्गतमात्रे 'नन्दन' शब्दे स साञ्जलि 'जी' कारपूर्वं तदादेशं लब्धुं पालयितुं च सदैवोद्यत आसीत्। प्रतिरात्रं गुरुभगवतां विश्रामणादिभक्तिं कृत्वा तेषु निद्राधीनेषु एव स्वीयस्वाध्यायं कृत्वा पश्चान्निद्राति स्म।

किं बहुना? गुरुभगवत्स्वेव तदस्तित्वं विलीनमिवाऽभूत्। अनया गुरुभक्त्येदृशेन च समर्पणेन तेन गुरुभगवतामियती कृपा प्राप्ता यदाजीवनं सूरिसम्राजां मुखे 'उदय-नन्दन' इति नामयुग्ममासीत्।

दशवर्षमात्र एव दीक्षापर्याये तस्यैतावतीं प्रचण्डप्रतिभां, व्यावहारिकं नैपुण्यं, विनयादिगुणसम्पत्तिं, गहनमध्ययनं, सुस्थं तपः, सात्त्विकवृत्तिं च निरीक्ष्य सूरिसम्राजां चित्ते तस्मै पंन्यासपदप्रदित्सा तदनुचाऽऽचार्यपदप्रदित्सा जाता। अतस्तं तैर्भगवतीसूत्रस्य योगोद्वहनं कारयित्वा वैक्रमीयशून्य-सिद्धि-निधि-तरणि(१९८०)वर्षेऽहमदाबादनगरे पांजरापोळक्षेत्रे पंन्यासपदं प्रदत्तम्।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तदनन्तरमहमदाबादनगरश्रेष्ठिश्रीकस्तूरभाई-मणिभाईविज्ञप्त्या सूरिसम्राड्भिरहमदाबादनगरे शाहीबागक्षेत्रे वैक्रमीयलोक-सिद्धि-निधि-मार्तण्ड-मिते(१९८३)वर्षे वैशाखे मासि दीक्षाया-श्चतुर्दशे स्वायुषश्चाऽष्टाविंश एव वर्षे पंन्यासश्रीनन्दनविजयाय 'न्यायवाचस्पति-शास्त्रविशारद-सिद्धान्तमार्तण्ड-कविरत्न 'इत्येतैश्चतुर्भिर्यथार्थबिरुदैः सह आचार्यपदं प्रदत्तम् । अतः परं ते आचार्यश्री**विजयनन्दनसूरि**रित्याह्वया जगति प्रासिध्यन् ।

व्यतीतेषु त्रिषु वर्षशतेषु प्रथमवारमेवेयति लघुपर्याये लघुवयसि च केनाऽप्याचार्यपदं प्राप्तम् । तथाऽपि तन्मनस्यहङ्कारलवोऽपि नोदितो नाऽपि च जीवने आडम्बरः प्रविष्टः । किन्तु सरलता, सात्त्विकता निराडम्बरता चैव वृद्धिङ्गता यावत् तेषामस्थिमज्जयोः प्रविष्टा इव ।

इतस्तदाचार्यपदप्रदानमसहमानैरीर्ष्याद्वेषदूषितैः कैश्चिद्विरोधितत्त्वैः प्रेरित एकः कश्चिद् धनिकः श्रेष्ठी सूरिसम्राट्पार्श्वमागत्योक्तवान् -" भगवन्! वयं नूतनाचार्यभगवतां वाणीं शुश्रूषवोऽतः पूज्यपादास्तान् विद्याशालां प्रेषयेयुः ।"

तदभिप्रायं विज्ञातवन्तः सूरिसम्राजो विजयनन्दनसूरीन् विद्याशालां गन्तुमादिशन् । तेऽपि 'तथे'ति कृत्वा सत्वरं तत्र प्राप्ताः । इतो विद्याशालायां तदीर्ष्यामात्सर्यप्रेरिता बहवो लोका-स्तद्व्याख्यानं श्रोतुं सम्मिलिता अभवन् । श्रीनन्दनसूरिभिरपि स्वीयापूर्वशैल्या स्वस्थवृत्त्या चाऽतीवरुचिरं व्याख्यातम् । तद्वर्णनं तु श्रोतार एव कुर्युः, अत्र तु तदेव रसप्रदं यद्- व्याख्यानान्ते-ऽत्यन्तप्रहृष्टेन तेन धनवता निजपार्श्वस्थानि सर्वरूप्यकाणि परितः सभायां प्रक्षिप्तानि । ततो नूत्ना-चार्याभ्यर्णं गत्वा स्वधृष्टतां क्षमयितुं प्रार्थयत् । तदनन्तरं गुरुभगवदादेशेन श्रीसङ्घस्याऽऽग्रहेण च तद्वर्षे चतुर्मास्यपि भव्यरीत्या तैर्विद्याशालायामेव गमिता ।

अपि च निजगभीरशास्त्राभ्यासेन सह तैर्विनाऽध्ययनं केवलमनुभवबलेनैव ज्योतिःशास्त्रे शिल्पशास्त्रे च नैपुण्यं प्राप्तम् । परमगुरुसूरिसम्राजां गुरुभगवच्छ्रीविजयोदयसूरीणां च सान्निध्येन तैरनयोर्द्वयोरपि विषययोरगाधं ज्ञानमनेकेऽनुभवाश्च स्वतीव्रमेधया लब्धाः । ततो ज्योतिषि आरम्भसिद्धि-मुहूर्तमार्तण्ड-मुहूर्तचिन्तामणि-दिनशुद्धिदीपिकादयः, शिल्पे तु शिल्परत्नाकर-वास्तुसार-दीपार्णवाद्या अनेके ग्रन्थास्तैः स्वयमेव परिशील्य तथाऽऽत्मसात् कृता यथा मुहूर्त-शिल्पविषयकगुण-दोषयोः पोषकाः विरोधिनोऽपवादसम्बन्धिनश्च शास्त्रपाठास्तद्रहस्यं च सदैव



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तन्मनसि प्रास्फुरन्।

मुहूर्तज्ञानेन तैः समग्रभारतवर्षस्य शतशो जैनसङ्घेभ्यः खातमुहूर्त-जिन-बिम्बप्रवेश-अञ्जन-शलाका-प्रतिष्ठा-योगोपधान-सङ्घप्रयाण-तीर्थमालारोपणादिधर्मानुष्ठानविषयकानि, स्व-पर-सर्वगच्छ-समुदायवर्तिभ्यो यावत् तेरापन्थ-स्थानकमार्गिभ्योऽपि सहस्रशः साधु-साध्वीभ्यः विहार-नगरप्रवेश-दीक्षा-पदप्रदानादिविषयाणि च सङ्ख्यातीतानि मुहूर्तानि प्रदत्तानि। सर्वाघसंहारिण्या सर्वकल्याणकारिण्या सुनिर्मलभावनया प्रदत्तैः पवित्रमुहूर्तैः सर्वेषां धर्मानुष्ठानानि निर्विघ्नतया साफल्यं प्रापन्। प्रत्यहं बहवो जनास्तत्पार्श्वे साक्षात् पत्रद्वारा च मुहूर्तानि लब्धुमागच्छन्। तदा निजशक्तितोऽप्यधिकश्रमं कृत्वा ते सर्वान् सन्तोषयितुं प्रायतन्त। इदं त्वत्र बोध्यं यत् ते स्वजीवने सांसारिकप्रवृत्त्यर्थं मुहूर्तदानात् फलादेशविषयकज्योतिषो मन्त्र-तन्त्रादिभ्यश्च सर्वदैवाऽलिप्ता आसन्।

शिल्पज्ञानेनाऽपि शतशो जिनप्रासादास्तन्मार्गदर्शनानुसारं निर्मितिं प्राप्ताः। एवंविधेन मुहूर्तज्ञानेन शिल्पज्ञानेन च मुहूर्त-महातीर्थतया प्रसिद्धानां तेषां ख्यातिः सर्वत्र प्रासरत् जनाश्च तान् बहु प्राशंसन् किन्तु तन्मनस्यभिमानलवोऽपि न स्पृष्टः। अपि तु श्लाघमानान् लोकान् तैः सदा सरलतयेदमेवोक्तं यत् "सर्वोऽप्ययं सूरिसम्राजामाशिषः प्रभावः। अहं तु पामरोऽज्ञानी चाऽस्मि।"

यत्र यत्र पाण्डित्यं तत्र तत्र दारिद्र्यं आर्थिकं वा शारीरिकं वा। तत्र शरीरविषये एतदुक्तिं चरितार्थीकुर्वतां तेषां देहोऽपि पूर्णतया निरामयो नाऽभवत्।

दीक्षाया प्रारम्भिकेषु वर्षेष्वेव वैक्रमीयवेद-मुनि-निधि-सूर (१९७४) वर्षे बीकानेरनगरे तेषां हृदयशूलरोगोऽभवन् किन्तु गुरुभगवतां निरन्तरैः कुशलोपचारैः सत्वरं ते स्वस्थीभूताः। वैक्रमीय-भुवन-सिद्धि-निधि-मार्तण्डमिते(१९८३) वर्षे वायोर्व्याधिरलगत्। सोऽपि च यावज्जीवं तानुपाद्रवीत्। एवं दक्षिणपार्श्वपीडा-यकृत्पीडा-यकृच्छोफादयोऽप्यनेके व्याधयो यावज्जीवं तेषां साहचर्यमकुर्वन्। वैक्रमीये चन्द्र-चन्द्र-ख-युगलमिते(२०११) वर्षे तैर्ज्ञानपञ्चमीदिने उपवासः कृतस्तदनु षष्ठीदिने पारणकानन्तरं तत्स्वास्थ्यमत्यन्तं व्यकरोत्। ते मूर्च्छां प्राप्ताः। त्रीणि दिनानि यावद् वैद्यैर्बहव उपचाराः कृतास्तथाऽपि ते न सज्जीभूताः। तदा



Jain Education International For Private & Personal Use Only www.jainelibrary.org

जीवदयारुचिना श्रावकसाराभाई-इत्यनेन सौनिकगृहात् शतशो जीवा मोचयित्वा तत्समीप आनीताः। ततस्तेषां कर्णमूले -“ भगवन्तः! भवदारोग्यनिमित्तमेनं जीवमभयपूर्वकं मोचयामः ।” इत्युक्त्वा प्रत्येकं प्राणिनं बहिर्नयति स्म। एवं शतशः कृतम्। ततोऽपराह्णे वैद्यैरन्तिमोपचारतया सूचिवेधप्रयोगेणौषधं दत्तम् । तेनौषधेन शनैः शनैः सज्जीभवद्भिस्तैस्त्रिभिर्दिनैर्भानं लब्धम् । सभानान् तान् दृष्ट्वा तत्रस्था मुनयो मिलिताश्च जना अतीवाऽऽनन्दं प्राप्ताः। सर्वैरुच्चनिर्घोषेण जयनादः कृतः । एतद्दृष्ट्वा ते सुप्तोत्थिता इवाऽऽश्चर्यं प्राप्ताः। ततो विदितस्ववृत्तान्तास्ते कथितवन्तो यद् - “मयाऽद्य पुनर्जन्म लब्धम् ।” एतदनन्तरं वर्षं यावत् तेऽनेकव्याधिभिरुपद्रुता वैद्योपचारैश्चेषत्स्वस्थतां प्रापन्। किन्तु पूर्ववत् स्वास्थ्यं तु नैव लब्धम्। वैक्रमीये सिद्धि-सूर्य-शून्य-युग्ममिते सिद्धि-युग्म-शून्य-युग्म-मिते(२०१८-२०२८) च वर्षे दक्षिण-वामपार्श्वयोः सारणग्रन्थेरुपद्रवोऽभूत्। शस्त्रक्रियया च ते सज्जीभूताः।

वैक्रमीयसूर्य-लोक-शून्य-युग्ममिते(२०३१) वर्षे तेषां कफप्रकोपोऽभूत् तेन च शीतज्वरो लग्नः। दिनद्वयेनाऽपि स व्याधिर्नैव नष्टः। ततः सर्वेषु चिन्तिता अभवन्। किन्तु वैद्यानां साधूपचारैर्निरामयीभूतास्ते पुनरपि पुनरवतारो लब्ध इत्यन्वभवन्।

एवं चाऽन्यैरपि बहुभिर्लघुव्याधिभिस्तेऽपटुशरीरत्वादाजीवनमुपद्रुताः । किन्त्विदमत्र ज्ञेयं यदेतावद्भिर्व्याधिभिः पीडिता अपि ते निजसत्त्वपूतचारित्रबलेन दृढ-स्थिरमनोबलेन च स्वमनसा कदाऽप्यस्वस्था नाऽभवन् नाऽपि च शासन-सङ्घ-तीर्थादीनां कार्याणि स्थगितवन्तः।

शरीरविषये ते दारिद्र्यमन्वभवन्नपि गुणसम्पत्त्या तु चक्रवर्तिनोऽप्यधिकसमृद्धिमन्त आसन्।

निराडम्बरा सरलताऽऽजीवनं तेषां विचार-वचो-वर्तनेषु क्षीरनीरतयाऽऽत्मसाद्भूता। तैः स्वजीवने कदाऽपि दम्भलवयुतमपि न चिन्तितं नाऽऽचीर्णं न चाऽन्येषां वञ्चना स्ववचनैः कृता। यत्कार्यं मनसि चिन्तितं तदेव वचस्सु प्रकटितवन्तस्तदेव चाऽऽचरन्ति स्म। बाह्याडम्बरस्तु कदाऽपि तज्जीवने प्रविष्टिं न प्रापत्।

एवं सहजसहिष्णुताऽपि तैर्निजजीवने सुसाधिता। स्वनिन्दकैर्विरोधिभिरवर्णवादिभिश्च ते कदाऽपि नाऽस्वस्थीभूताः नाऽपि तद्विरोधाय प्रत्युक्तवन्तः। अपि तु तत्करुणया, प्रेम्णा तत्कार्यसाधकतया च तान् स्वानुकूलितवन्तः। एषाऽपि सहिष्णुता व्यापकरूपेण परमतसहिष्णुतया



Jain Education International For Private & Personal Use Only www.jainelibrary.org

परधर्मसहिष्णुतया च विस्तृता। अनया परिणतसहिष्णुतया ते पातञ्जलयोगदर्शन-भगवद्गीता-मनुस्मृत्यादीनां सिद्धान्तैः सह जैनसिद्धान्तानां समन्वयं कृत्वा स्वप्रवचनं व्याख्यातवन्तः। वेदान्तस्याऽपि गहनाभ्यासित्वात् ते द्वैताद्वैतविषयं तत्त्वज्ञानं तज्ज्ञैरन्यधर्मिभिश्च सरसं चर्चितवन्तः।

शैवादीनामितरधर्मिणां धर्मकार्याणि श्रुत्वा प्रसन्नीभूतास्ते तान् सर्वदा प्राशंसन् यद् - 'इयतांशेना-ऽपि तेषु धर्मभावना विद्यते। यद्यपि तेऽजैनास्तथाऽपि ते धर्मभावनयैव निजधर्मकार्यं कुर्वन्ति। अनया धर्मभावनयैवाऽस्माकं संस्कृति सर्वदा विजयवती वर्तते।'

आत्मीयत्वं सहृदयत्वं च तत्स्वभावेऽभिन्नाङ्गायेते स्म। आत्मीयत्वात् तेषां द्वेषिणोऽपि भक्तायन्ते स्म, सहृदयत्वाच्च विद्वांसः सज्जना लोकविख्याताश्च जनास्तानादरयन्।

तेषां विशालहृदयगुहाया वात्सल्यामृतनिर्झरं सदैवाऽवहत्। संसारक्लेशदग्धा जीवास्तदन्तिक-मागत्य चित्तशान्तिमनुभूतवन्तो वात्सल्यामृतपानं च कृत्वा धन्यंमन्याश्चाऽभवन्। कदाऽपि पङ्क्ति-भेदमकृत्वा तैर्निर्झरवत् सर्वान् धनिकनिर्धनान् सामान्यप्रसिद्धांश्च जनानविशेषं स्ववात्सल्यसुधापानं कारितं, यावन् मार्गच्युताः पतिता वाऽपि तैः स्ववात्सल्यसिन्धौ स्नापिताः पुनरपि च मार्गस्थीकृताः।

एतेन शिष्टेषु ' यस्य कोऽपि नाऽस्ति तस्य श्रीनन्दनसूरिः ' इत्युक्तिः प्रासिध्यत्। अनेन निर्व्याजेन निःस्वार्थेन च वात्सल्येन ते स्वसमयेऽजातशत्रूभूता आसन्। जनसामान्येष्वपि तान् प्रत्येषा पूर्णश्रद्धा आसीत् यत् - ' श्रीनन्दनसूरिमहाराजानामाशीर्वादेनाऽस्माकं जीवनं शान्तिमयं भवेत्। ' अनयैव श्रद्धया प्रभूता जनाः प्रत्यहं तान् वन्दितुं तदाशिषं च लब्धुमागच्छन्। तेऽपि प्रसन्नहृदयेन वासक्षेप- मङ्गलोच्चरण-सूरिसम्राड्नामोच्चरणपूर्वं सर्वेभ्य आशिषमददन्। तेभ्यो बालका अतीव प्रिया आसन्। अतो बहुशस्तेऽपारवात्सल्येन बालकैः सहाऽऽनन्दं कुर्वन्तो व्यलोक्यन्त। तेषां व्याख्यानमपि मैत्र्यादिभावनाभावितं विश्ववात्सल्यवासितं चाऽऽसीत्।

निर्बन्ध-वस्तुलक्षिगुणानुरागितया ते यत्र तत्र सर्वत्र विख्यातिं प्रापन्। स्वपरसमुदाय-गच्छस्थानां साधुसाध्वीनां सत्कार्याणि सदनुष्ठानानि च ते हृदयपूर्वकमन्वमोदन्त। श्रावकाणां गृहस्थानां चाऽप्युचितप्रवृत्तिं ते सदा प्राशंसन्।

निष्पक्षता तेषां गुणेषु मूर्धायते। ' सकलसङ्घहितार्थं ते स्व-पर-पक्षमवगणय्य तटस्थवृत्त्यैव



Jain Education International For Private & Personal Use Only www.jainelibrary.org

वर्तन्ते' इति जनसमाजे दृढश्रद्धाऽऽसीत्। अतस्ते प्राय: सर्वसङ्घानां श्रेष्ठिआणंदजीकल्याणजी-संस्थायाश्च मुख्यमार्गदर्शकतया प्रसिद्धिं प्रापन्।

तेषां गुरुभक्तिरप्यद्वितीयाऽऽसीत्। स्वदीक्षाप्रभृति सूरिसम्राजां स्वर्गगमनं यावत्तैरखण्डं सूरिसम्राजामाहार-प्रतिलेखना-परिचर्या-विश्रामणादिवैयावृत्त्यं कृतम्। आजीवनं तै: सूरिसम्राड्भ्यो यद् रोचेत तदेव कृतं, तेषामनुशासनमाज्ञाश्च सदैव पालिता:, सूरिसम्राड्भिर्निजजीवने ये ये आदर्शा: सिद्धान्ताश्चाऽङ्गीकृता आचरिताश्च ते त एवाऽऽदर्शा: सिद्धान्ताश्च तै: सूरिसम्राट्सु जीवत्सु स्वर्गतेषु चाऽपि स्वजीवने एकनिष्ठतया स्वीकृता पालिताश्च। अनयाऽनन्यगुरुभक्त्या ते गुरुभगवतां हृदयेऽवसन्। 'ते धन्या येषां हृदये गुरुभगवतां वास: किन्तु ते धन्यातिधन्या ये गुरूणां हृदये वसन्ति।' एतदुक्तिं चरितार्थीकुर्वाणा श्रीविजयनन्दनसूरय: सत्यं धन्यातिधन्या अभवन्। तेषा-मुत्कृष्टां भक्तिं दृष्ट्वा जना अवदन्- "सूरिसम्राजां द्वे प्रतिच्छाये-श्रीविजयउदयसूरय: श्रीविजयनन्दनसूरयश्च।"

सूरिसम्राड्भिरादृतेषु सर्वेष्वञ्जनशलाका-प्रतिष्ठादिष्वनुष्ठानेष्वन्येषु च कार्येष्वामूलचूलमेतौ द्वौ गुरुशिष्यावेव प्रावर्तेताम्। स्वजीवनस्य प्रतिपलं गुरुभगवतां चरणयो: समर्पयतां तेषां सूरिसम्राजां स्वर्गगमनप्रसङ्गोऽतीवाऽऽघातकार्यासीत्। अतो यदा कदाऽपि तन्नामश्रवणानन्तरमेव तेषां नेत्रे अश्रुभिरपूर्येताम्।

सूरिसम्राट्सु स्वर्गतेषु तज्जीर्णोद्धृतस्य कदम्बगिरितीर्थस्य सर्वाङ्गीणविकासार्थं ते सर्वायासेन प्रयत्नान् कृतवन्त:। तेषां मनसि सततमेषा भावनाऽरंरम्यत यत् -'सूरिसम्राड्भिश्चिकीर्षितानि सर्वाण्यपि कार्याणि पारङ्गमयितव्यान्येव।'

सूरिसम्राजां स्वर्गमननान्तरं ते निजकार्येषु सदा तदन्त:प्रेरणयैवाऽवर्तन्त। प्रत्यहं स्वान्तिक-मागतान् लोकान् ते सूरिसम्राजां नामोच्चरणपूर्वमेव वासक्षेप-मङ्गलोच्चरण-मुहूर्तदानादि कृतवन्त:। निजगुरुभगवत्सहितैस्तैर्बहुभि: प्रयत्नै:सङ्कलितं सूरिसम्राजां जीवनचरित्रमपि तज्जन्मशताब्दीवर्षे श्रीशीलचन्द्रविजयमुनिना लेखयित्वा ग्रन्थस्वरूपेण प्रकाशितम्। तेषामनन्यां गुरुभक्तिं गुरुश्रद्धां च तत्स्वशब्देष्वेव पश्याम: - "जगद्वन्दनीया, जगद्गुरवो, जैनधर्मस्य शासनसम्राजो, वर्तमानसमये युगप्रधानतुल्या:, बाल्यादखण्डब्रह्मचर्येण



Jain Education International For Private & Personal Use Only www.jainelibrary.org

जाज्वल्यमाननक्षत्रतुल्याः, सुगृहीतनामधेयाः, सूरिचक्र-चक्रवर्तिनः परमपूज्याचार्यभगवन्तः **श्रीविजयनेमिसूरीश्वरजिन्महाराजाः,**

ये मम महोपकारिणः,

ममाऽनाथस्य नाथाः,

ममाऽशरणस्य शरण्याः,

मम परमोद्धारकाः,

मम तारकाः,

ममाऽबोधकस्य बोधकाः,

मम सम्यग्दर्शन-ज्ञान-चारित्रस्वरूपां रत्नत्रयीं प्रापकाः, तस्यां स्थिरीकारकाः, उत्तरोत्तरं तद्वृद्धिकारकाः,

मां च वीतरागशासने इयदुच्चकोटौ स्थापकाः सन्ति।

मां पामरकीटकरूपं कुञ्जरीकारकाणां परमगुरुभगवतां तेषामुपकारस्यर्णं भवकोटिकोटिष्वपि निवर्तयितुं न शक्नोमि। तेषां मुखकमलेऽन्तिमश्वासेऽपि 'उदय! नन्दन!' इतिनामयुग्ममासीत्।" इत्यादि। एनां गुरुभक्तेः पराकाष्ठां वन्दामहे।

तेषां व्यक्तित्वं शान्तमोजस्वि चाऽऽसीत्। निजौदार्यपूर्णवृत्त्या ते स्व-पर-पक्ष-समुदाय-गच्छेषुसर्वसङ्घेषु च मार्गदर्शनार्थं सर्वमान्यसूरिवरतया प्रसिद्धा आसन्।

नैतिकसत्त्वं, सत्यदार्ढ्यं, दीर्घदृष्टिः, उचितनिर्णयशक्तिः, विघ्नशतैरप्युचितनिर्णयादपरावर्तनं, सर्वत्रौचित्ययुक्तो व्यवहारः, स्पष्टवक्तृत्वं, सङ्घैक्याभिलाषः, सर्वतोमुखी ज्ञानप्रतिभा, लोकैषणा-मानैषणात्याग इत्यादयोऽनेके गुणास्तेषां जीवननभसि तारकायन्ते। किन्तु, अपरिमेयत्वात् तेषां वर्णनं कर्तुमसमर्था वयम्।

एतत्तु चिन्त्यं यत् -स्वदीक्षाप्रभृति यावज्जीवं तैर्निजसंसारिकुटुम्बिजनैः सहाऽनासक्ततया कदाऽपि पत्रसम्पर्कोऽपि न कृतः। एनां निर्लेपतां स्मारं स्मारं तत्कुटुम्बिनोऽद्याऽपि गौरवमनुभवन्ति। अनयैव निर्लिप्त्या प्रभावितेन तेषां संसारिज्येष्ठबन्धुना श्रीसुखलालेन वैक्रमीये



Jain Education International For Private & Personal Use Only www.jainelibrary.org

निधि-मुनि-निधि-सोम- मिते(१९७९) वर्षे श्रीस्तम्भनपुरे सूरिसम्राजां हस्तेन दीक्षामङ्गीकृत्य पूज्याचार्यवर्यश्री-विजयोदयसूरीणां शिष्यत्वं स्वीकृतम् । तन्नाम मुनिश्रीसुमित्रविजयेति स्थापितम् । विनय-वैयावृत्त्य-शास्त्राभ्यासागमाध्ययन-निर्दोषचारित्रपालनादिगुणैस्ते उपाध्यायपदवीं प्राप्ताः। गुरुभगवता-मत्याग्रहेणाऽप्याचार्यपदवीं निषिध्य पञ्चचत्वारिंशद् वर्षाणि दीक्षां प्रपाल्य स्वसमग्रजीवनं गुरुनिश्रायामेव व्यतीय वैक्रमीयवेद-नेत्र-शून्य-युग्म-मिते (२०२४) वर्षे श्रीकदम्बगिरितीर्थे स्वर्गं गताः । इतो वैक्रमीये सिद्धि-सिद्धि-निधि-सोममिते(१९८८) वर्षे तेषां संसारिपितुः श्रीहेमचन्दश्रेष्ठिनोऽन्तिमसमये तत्समाधिप्रदानार्थं सूरिसम्राड्भिर्बोटादनगरे चतुर्मासी कृता । ततः सूरिसम्राजां पुत्राचार्यश्रीविजयनन्दनसूरीणां च पावनसान्निध्येन प्रसन्नतां समाधिभावं च प्राप्य श्रीहेमचन्दश्रेष्ठी समाधिमरणेन दिवङ्गतः ।

वैक्रमीयसिद्धि-चन्द्र-शून्य-नेत्रमिते(२०१८) वर्षे द्वितीयस्य संसारिज्येष्ठबन्धोः श्रीहरगोविन्द-दासस्य विनत्या उपाध्यायश्रीसुमित्रविजयसहिताः श्रीविजयनन्दनसूरयो बोटादनगरं चतुर्मास्यर्थं प्राप्ताः । तत्सान्निध्ये धर्मभावं साधयित्वा सोऽपि समाधिना स्वर्गतः । इति प्रासङ्गिकम् ।

समस्तसङ्घैक्याय प्रथमं सूरिसम्राड्भिः सहितैस्तत्स्वर्गमनान्तरं च स्वतन्त्रतया तैस्तिथिचर्चायां श्रमणसङ्घस्य नेतृत्वं स्वीकृत्य यत्कार्यं कृतं तदविस्मरणीयं, किन्तु विस्तारभयादत्राऽप्रस्तुतम् ।

सूर्यतेजसि ग्रहादितेजांसीव सूरिसम्राजां शुभकार्येषु तेषां शुभकार्याणि सङ्क्रान्तानि । सूरिसम्राट्सु स्वर्गतेषु तदादृतान्यन्यान्यपि च बहूनि शुभानि कार्याणि तैर्निजजीवने कृतानि कारितानि च ।

तेषु मधुपुरी(महुवा)-अहमदाबाद-साभ्रमती-कदम्बगिरि-सुरेन्द्रनगर-पादलिप्तपुर-वलभीपुर-राणकपुर-स्तम्भनपुर-बोटाद-श्रीशत्रुञ्जयानदीबन्ध-(डेम)आदिस्थलेषु जिनालय-जिनबिम्बादीना-मञ्जनशलाका-प्रतिष्ठा, स्व-परसमुदायस्थानेकसाधुभगवद्भ्य आचार्यादिपदप्रदानं, प्रभूतजनानां दीक्षा-बृहद्दीक्षे, उपधानादीनि शतशो धर्मानुष्ठानानि, सूरिसम्राजां जीवनचरितमयस्य शासनसम्राडा-ह्वग्रन्थस्य प्रकाशनं - इत्यादीनि मुख्यानि सन्ति ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रमणभगवतो देवाधिदेवपरमात्मश्रीमहावीरस्वामिनो निर्वाणस्य पञ्चविंशशताब्दी-निमित्तमादृतस्य महोत्सवस्य दीर्घदृष्टिपूर्वकं सफलं नेतृत्वं तेषां जीवनकार्येषु मूर्धायते।

सुबहुभिर्विरोधैरप्यविचलिततया तैर्जैनश्वेताम्बरमूर्तिपूजकश्रमणसङ्घस्य नेतृत्वमङ्गीकृत्य निर्वाणमहोत्सवः प्रवर्तितः, तस्य भारतदेश-प्रधानमन्त्रिश्रीमतीइन्दिरागान्धी-राष्ट्रपतिप्रभृतिभ्यः शुभाशीर्वाद-शुभेच्छा-सन्देशप्रेषणादिवृत्तान्तः सरसोऽपि नाऽत्र वर्ण्यते। एतैः सर्वशुभकार्यैर्याः शासनप्रभावनास्तैः कृता यच्च कुन्देन्दुनिर्मलं यशः प्राप्तं ततोऽपि, स्वजीवनस्य प्रतिक्षणं जिनशासन-समर्पणं, देव-गुरु-धर्मेष्वनन्यनिष्ठा, स्व-परगच्छस्थसाधु-साध्वीनां वात्सल्यपूर्णा विश्रामणा, स्व-समीपमागतानां जनानां कल्याणभावना, सङ्घैक्याभिलाषः, अनेकविधमुहूर्तदानं-इत्यादिभिस्तैर्याः शासनप्रभावनाः कृताः यच्च स्फारयशो लब्धं तद् बोद्धुं तस्य गणितिं कर्तुं चाऽस्मादृशामैदंयुगीनानां तुच्छबुद्धीनां शक्तिर्नास्त्येव।

वैक्रमीये नेत्र-भुवन-शून्य-कर्णमिते (२०३२)संवत्सरे तेषां वयसोऽष्टसप्ततितमवर्षारम्भे कार्तिके मासि अहमदाबादस्थेनाऽन्यैश्च सङ्घैस्तेषां जीवनभव्यतामभिवादयितुं पञ्चदिवसीयो मङ्गलमहोत्सव आयोजितः । तत्र महोत्सव एव तेषां गुणानुमोदनसभा योजिता। तदाऽनेकैः प्रसिद्धैः सामान्यैश्च जनैस्तेषां गुणस्तुतयः कृताः। इदमत्र चिन्तनीयं सुधीभिः- यत् तिथिचर्चा-वीरनिर्वाणमहोत्सवादिषु बहुप्रसङ्गेषु विरोधिभिर्मुखशतैस्ते निन्दितास्तदा यथा तैर्निरपेक्षतया निर्विकारवृत्त्या च सर्वमपि सोढं तथाऽत्र सभायां तत्पुर एव प्रारब्धे प्रशंसाप्रसङ्गेऽपि ते निर्लेपतां निर्विकारवृत्तिं च समाश्रयन्। विरला व्यक्तय एवेदृशे स्तुतिप्रसङ्गेऽहङ्कारेण न लिप्यन्ते। सूरिसम्राजां कृपाप्रसादेन स्वीयसरलतानम्रतादिभिश्च सद्गुणैरहङ्कारं नाशयित्वा तेऽपि विलक्षणव्यक्तित्व-भाजोऽभवन्।

कियद् वा **तेषां गुण**वैभवं गणयामः? स तु जलनिधिरिव निष्पारः,वयं हि निःस्थामानस्तं तरीतुम्। अतः पूज्यवर्याणां जीवनसन्ध्यावृत्तं विचारयामः।

श्रीशत्रुञ्जयमहातीर्थे बहुवर्षेभ्य पूर्वं तेषां मुहूर्त-मार्गदर्शनपुरस्सरं शतशो जिनप्रतिमा उत्थापिता आसन्। तासां पुनः प्रतिष्ठार्थं श्रीआणंदजी-कल्याणजीसंस्थया मूलजिनप्रासादस्य परिसर एव नवीनं जिनालयं निर्मापितमासीत्। ततस्तानि जिनबिम्बानि प्रतिष्ठापयितुं



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्राऽऽगमनाय संस्थामुख्य-श्रेष्ठिश्रीकस्तूरभाई-लालभाई-इत्यनेनाऽन्यैश्च सङ्घाग्रणीभिर्विनति-पूर्वकं ते आमन्त्रिता: । अतस्ते पादलिप्तपुरमभिगन्तुमुद्यता: मार्गशीर्षकृष्णतृतीयादिनेऽहमदाबादतो विहारमारब्धवन्त: ।

आचार्यश्रीविजयप्रियङ्करसूरि-श्रीविजयसूर्योदयसूरि-श्रीदुर्लभसागरसूरिप्रभृतिभि: सह विहरन्तस्ते क्रमेण मृगशीर्षकृष्णचतुर्दशीदिने तगडीग्रामं प्राप्ता: । तत्र प्रात:समये आहारं गृहीत्वा सूर्यातपं ग्रहीतुमुपाश्रयस्य बहिर्भागे उपविष्टैस्तैर्मम गुरुभगवतो भगवद्गीताया द्वितीयाध्यायस्य स्थितप्रज्ञस्वरूपवर्णनस्य श्लोका: पाठिता: । अपराह्णे आकरुग्रामात् पूर्वपरिचितो वैद्यश्रीकिशोरभाई-इत्यागत: । तेन सार्धं ते स्वास्थ्यचर्चां कृतवन्त: । तत: सायंकाले दशोनपञ्च-वादने आहारग्रहणा-नन्तरं मुखमाचमतां सहसा- " भो! मम किमपि भवती" ति वदतां तेषां शिरोऽवनतं,जिह्वा वलिता । हस्तात् पात्रं पतितम् । मुखाच्छब्दा विशीर्णा: । द्रागिति सर्वे मिलिता: । कार्यवशादन्यत्र गतो वैद्योऽपि द्रुतमााहूत: । तेनाऽप्यागत्य नाडीपरीक्षणं कृत्वा सर्वेभ्य: कथितं - "महाराजा:! गुरुवर्याणां स्वास्थ्यं चिन्ताजनकं ज्ञायते " इति । तच्छ्रुत्वा सर्वै: कथितं -"वैद्य! येन केनाऽप्युपचारेण तान् सज्जीकरोतु भवान् ।" ततस्तेन सूचिवेधेनौषधं दत्त्वा धन्धुकानगराद् गान्धीनामानं वैद्यमाह्वातु-मनुरुद्धम् । झटिति तद्व्यवस्था कृता । किन्तु प्रतिक्षणं पूज्यवर्याणामस्वस्थताऽवर्धत । तद् दृष्ट्वा वैद्येनोक्तं -" भगवन्त:! गुरुभगवन्तो न चिराय । भवन्तो यत्कर्तव्यं द्रुतं कुर्वन्तु ।"

सत्वरं सर्वैर्नमस्कारमन्त्ररटनमारब्धम् । चतु:शरणस्वीकारपाठश्च भणित: । तच्छ्रुत्वा गुरु-भगवद्भि: क्षणं नेत्रे उन्मील्य परितो दृष्ट्वा निमीलिते । तन्मुखे प्रसन्नं मृदु च हास्यं प्रसृतम् । विंशत्यधिकपञ्चवादने तेषां नाडी रुद्धा । वैद्येन सम्यक् परीक्ष्य पञ्चक्षणानन्तरं कथितं - " हृदयं स्थगितम् । गुरुभगवन्तो न विद्यन्तेऽस्मिन् देहे । " ए तदाकर्ण्य सर्वे स्तब्धीभूता: । कोऽप्येतत् सत्यं न मन्यते । तदात्वएव प्राणवायुसाधनादियुतो गान्धीनामा वैद्यो धन्धुकात आगत: । सर्वैश्चिन्तितं 'किञ्चिद् भविष्यति ।' किन्तु तेनाऽपि निरीक्ष्य कथितं - " निष्प्राणमेतत् शरीरम् ।"

सर्वेषां मनो हृदयं शरीरं च निश्चेष्टीभूतं स्त्यानीभूतमिव , सर्वत्र तम: प्रसृतमिव । वज्राहता इव सर्वे किंकर्तव्यविमूढा अभवन् । आ:! दु:शकं खलु तद् वर्णनम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्रुतमेवाऽहमदाबादनगरेऽन्यत्र च सर्वत्रैषः समाचारः प्रेषितः । तं प्राप्य शोकाकुलहृदयाः श्रावका अहमदाबाद-बोटाद-बरवाळा-वलभ्यादिनगरेभ्यः सत्वरं तगडीग्रामं प्राप्ताः। रात्रौ सर्वैरपि सम्मिल्य पूज्यवर्याणां नश्वरदेहं तज्जन्मभूमिं बोटादनगरं नेतुं निर्णीतम् । ततः फुलचन्दभाईआदिश्रावकै- र्गृहस्थोचितमन्तिमविधिं कृत्वा तच्छरीरं सम्यग्रीत्या दोलायां स्थापितम्।

द्वितीयदिने प्रातः सार्धचतुर्वादने चतुर्भिर्मुनिभिस्त्रिभिश्च गृहस्थैः सह द्वौ दोलावाहकौ दोला- मुत्पाट्य बोटादं प्रति प्रस्थितौ । मध्याह्नसमये बोटादमागत्य सर्वजनदर्शनार्थमुपाश्रये तद्देहः स्थापितः। इतो बोटादनगरेऽपि सहस्रशो जना मिलिताः। अन्यस्थलेभ्योऽपि प्रायो जनानां सहस्र- पञ्चविंशतिरागता। अपराह्णे त्रिवादने भव्यशिबिकायां गुरुभगवतां देहं प्रस्थाप्याऽन्तिममहायात्रा निर्गता। अखिलनगरं परिभ्रम्य सार्धपञ्चवादने जिनालयपुरः (यत्राऽधुना श्रीनेमि-उदय-नन्दन- विहारनामोपाश्रयो विद्यते तत्र) तेषां संसारिभ्रातृजेन श्रीजयन्तीभाई-इत्यनेनाऽश्रुपूर्णनेत्रेषु जनसहस्रेषु पश्यत्सु तद्देहस्याऽग्निसंस्कारः कृतः ।

अगम्यः खलु प्रकृतेः क्रमः । पूज्यवर्याणां संसारी पिता श्रीहेमचन्दश्रेष्ठी ज्येष्ठभ्राता हरगोविन्ददासश्चाऽष्टसप्ततितमे वर्षे दिवङ्गतौ। स्वयमपि तुल्यवर्षे कालधर्मं प्राप्ताः। सूरिसम्राजो वैक्रमीयाब्दस्याऽन्तिमे दिने स्वर्गताः। तदग्निसंस्कारस्तु वैक्रमीयनववर्षस्य प्रथमदिने कृतः। एते तु ऐसवीय-वर्षस्याऽन्तिमे दिने स्वर्गवासं प्राप्ताः, अग्निसंस्कारस्तु नववर्षस्य प्रथमे दिने कृतः । कः खल्वेतादृशान् रहस्यान् शोधयेत् ?

अथ मदीयं किञ्चित्।

यद्यप्यौदारिक-मानसाध्यात्मिकदेहेन तेषां पवित्रसान्निध्यं पुण्यनिश्रा च निर्भागधेयावतंसेन मया नैव प्राप्ते,तथाऽपि तद्विनिर्मितेन मदीयगुरुभगवद्रूप-निजप्रतिकृतिना जीवच्छिल्पदेहेन शब्ददेहेन च तेषां प्रसादपूर्णं सान्निध्यं कल्याणकरीं च निश्रां धन्यंमन्योऽहं सदैवाऽनुभवामि।

प्रान्ते, निर्दम्भसरलता-पवित्रसाधुतास्वामिनां गुरुवर्याणां कृपाप्रसादेन तदीयगुणरत्नाकराद् गुणलवोऽपि मदीयजीवने प्रकटीभवेत् तद्बलेन च दुर्गुणानां तमो दूरीकुर्यामित्यभ्यर्थयामि।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

सर्वतोमुखज्ञानप्रतिभया तैर्निजजीवने षोडश ग्रन्था विरचिताः। स्वस्थविद्वत्तया भव्यविचार-शक्त्या च तेषां सर्वकृतयः सुसमृद्धाः सन्ति। एतानि तन्नामानि -

| ग्रन्थनाम | रचनासंवत् | रचनास्थलम् |
| --- | --- | --- |
| १. जैनस्तोत्रभानुः | वैक्रमीय १९७२ | सादडी |
| २. जैनसिद्धान्तमुक्तावली- तत्त्वकल्पलताभिधटीकोपेता | " १९७५ | अहमदाबाद |
| ३. षडशीतिप्रकाशः(चतुर्थकर्मग्रन्थटीका) | " १९७६ | उदयपुर |
| ४. कर्मस्तवप्रकाशः(द्वितीयकर्मग्रन्थटीका) | " १९७९ | स्तम्भनपुर |
| ५. सूरिस्तवशतकम् | " १९७९ | " |
| ६. समुद्घाततत्त्वम् | " १९८४ | " |
| ७. तीर्थकृन्नाकर्मविचारः | " १९८५ | मधुपुरी(महुवा) |
| ८. प्रतिष्ठातत्त्वम् | " १९८९ | कदम्बगिरि |
| ९. मुनिसम्मेलननिर्णयानुवादः | " १९९० | अहमदाबाद |
| १०. स्याद्वादरहस्यपत्रविवरणम् | " १९९२ | कदम्बगिरि |
| ११. पर्युषणातिथिविनिश्चयः | " १९९३ | जामनगर |
| १२. आचेलक्यतत्त्वम् | " १९८४ | स्तम्भनपुर |
| १३. हैमनेमिप्रवेशिकाव्याकरणम् | " १९८६ | अहमदाबाद/ स्तम्भनपुर |
| १४. जैनतर्कसङ्ग्रहः | " १९८३ | स्तम्भनपुर |
| १५. श्रीपद्मावतीस्तोत्रम् | " १९८२ | पत्तन |
| १६. श्रीकदम्बगिरिस्तोत्रम् (एकस्मिन्नेव दिवसे विरचितम्) | " १९९३ | जामनगर |



Jain Education International For Private & Personal Use Only www.jainelibrary.org

## तेषां साहित्यप्रसादलेशमत्र प्रस्तौमि।

श्रीमत्स्तम्भनपार्श्वनाथभगवन्! लग्नं मनो मे त्वयि
तृप्तिं याति तथाऽपि तच्च तरलं नाऽद्याऽपि सम्मूर्च्छितम्।
तन्नाथ! त्वरया कृपैकसुधया मां सिञ्च सिञ्च प्रभो!
येन त्वन्मयतां गते नु हृदये नाऽऽप्नोमि दुर्वेदनाम् ॥१॥

(श्रीस्तम्भनपार्श्वनाथजिनाष्टकम्)

कदाऽहं कादम्बे विमलगिरिशृङ्गारतिलके
वसानः सन्तापं त्रिविधमपि तीव्रं प्रशमयन्।
परात्मान्यात्मानं समरसविलीनं च विदधत्
समानेष्ये सोऽहंध्वनितहृदयोऽशेषदिवसान् ॥२॥

वसन् कादम्बाद्रेः परमरमणीये परिसरे
स्थितो योगाभ्यासे शमदमसमाधानसुभगे।
जगन्नाथः त्रातश्चरमजिननाथेति प्रलपन्
अविश्रान्तं तत्त्वं निरवधि गमिष्यामि हि कदा?॥१३॥

नमस्ते कादम्बाऽमरनरनमस्याय च नमो
नमस्ते कादम्बाऽधरितपरतीर्थाय च नमः ।
नमस्ते कादम्बाऽवनितलललामाय च नमो
नमस्ते कादम्बाऽद्भुतगुणनिधानाय च नमः ॥३०॥

सिद्धक्षेत्रं शरीरं त्रिभुवनतिलकं मुख्यशृङ्गं शिरो मे
बाहुस्तालध्वजाद्रिः प्रथम इह तथा हस्तिसेनः परोऽयम्।
पुण्या शत्रुञ्जयेयं शमदमलहरी ध्यानयोगः कदम्बो
ज्योतिष्मानन्तरात्माऽप्यथ जयति तनौ नाऽस्ति किञ्चिद्बहिर्मे॥३३॥

(श्रीकदम्बगिरितीर्थराजस्तोत्रम् )

(१९९३तमेऽब्दे जामनगरचतुर्मास्यामेकस्मिन्नेव दिवसे रचितं चतुस्त्रिंशच्छ्लोकमयमेतत्स्तोत्रं पठित्वाऽतीव प्रमुदितैः सूरिसम्राड्भिः पूज्याचार्यश्रीसागरानन्दसूरीश्वराणां समक्षमत्युल्लासेन कथितं यद् -"पश्यत पश्यत सागरजिन्महाराजा! **मम नन्दने**नेदं स्तोत्रमेकस्मिन्नेव दिने विरचित"मिति।)



Jain Education International For Private & Personal Use Only www.jainelibrary.org

वैताढ्ये नमिना तथा विनमिना भक्त्या समाराधितं
शक्रेन्दूष्णगभस्तिनागपतिभिः स्वीये विमानेऽर्चितम् ।
श्रीकृष्णेन जरानिवारणकृते स्नात्रेण सम्पूजितं
श्रीशङ्खेश्वरपार्श्वनाथमनघं स्तौमीष्टसंसिद्धये ॥१॥

कीर्तिर्यस्याऽस्खलितमवनौ दीप्यते सर्वदिक्षु
पीयूषाम्भोनिधिलहरिका भारती सर्वभावा ।
धीसाम्राज्यं परिचितसमस्वान्यशास्त्रप्रपञ्चं
सोऽस्तु प्रौढप्रकटमहिमा नेमिसूरिर्मुदे नः ॥२॥

(समुद्घाततत्त्वे मङ्गलश्लोकौ)

प्रौढप्रभावसुभगा सुविशुद्धवर्णा
पूर्णाभिलाषविबुधेशनिषेवणीया ।
वाणी कवेरिव मुदं वितनोतु पुण्या
श्रीस्तम्भनाधिपतिपादनखावली वः ॥१॥

सिद्धान्ताश्च नयाः कणाद-कपिल-व्यासाक्षपादोद्भवा
मायासौनव-जैमिनीयसमया येनाऽखिला वेदिताः ।
तत्तन्नव्य-महार्थ-शास्त्ररचना-सम्प्राप्त-सद्गौरवः
सोऽयं श्रीगुरुनेमिसूरिभगवान् भट्टारको नः श्रियै ॥३॥

(आचेलक्यतत्त्वेऽन्तिममङ्गलश्लोकौ )

यद्धैर्येण समानभावकलितो मेरुस्तु दार्ढ्यान्वितो
गाम्भीर्येण समोऽपि यस्य जलधिः क्षारेण सम्पूरितः ।
यद्वक्त्रानुविधानकार्यपि सदा चन्द्रः कलङ्की खलु
सोऽयं सर्वगुणाकरो विजयते श्रीवर्धमानो जिनः ॥२॥

यं ध्यायन्ती सरस्वती त्रिभुवनस्वामिन्यथ श्रीमती
श्रीयक्षाधिपतिः सुराधिपतयश्चाऽशेषसम्पत्प्रदम् ।
सर्वा लब्धय आश्रयन्ति शरणं यं चैव नित्यं मुदा
वन्दे तं भगवन्तमादिममुनिं श्रीगौतमस्वामिनम् ॥३॥

(जैनसिद्धान्तमुक्तावल्यां प्रारम्भिकमङ्गलश्लोकौ )



Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रीमान् वीरजिनो जीयाद् यच्छासनरसायनम् ।
रसयित्वाऽभून्नूनं शिथिला मे भवार्त्तयः ॥२॥
श्रीगौतमेन्द्रभूतिः स्ताद् भव्यानामिन्द्रभूतये ।
कवलैः केवलालोककर्ता योऽभूत् तपस्विनाम् ॥३॥
यन्नामस्मृतिमात्रेण सिध्यन्ति सर्वकामनाः ।
सुधाधारोपमा यद्गीरमोघा भव्यदेहिषु ॥४॥
पूज्यास्ते शासनोद्धार-धुरीणा धीरबुद्धयः ।
पवित्रप्रौढसाम्राज्या जयन्ति नेमिसूरयः ॥५॥युग्मम्॥
(प्रतिष्ठातत्त्वे मङ्गलश्लोकाः)

किञ्च तैर्गूर्जरभाषायामपि तीर्थकराणां षट् स्तवनानि विरचितानि । विस्तारभयाच्चाऽत्र नोपन्यस्तानि ।

-----------

## अथ तेषां कानिचित् प्रासङ्गिकवचनानि प्रस्तूयन्ते

१. ( एकदा जापानीय एको बौद्धः साधुः चू-ची-हा-सी-इत्याह्व आगमाध्ययनार्थं भारतदेशमागतः । स कदाचित् पूज्यवर्यान्तिक मागतः । तदा तेन -"अद्यतने वैज्ञानिकयुगे धर्मस्य काऽवश्यकता ? कश्चोपयोगः?" इति पृष्टेऽयं तेषां प्रत्युत्तरः -) " धर्मोऽनीतिमाचरन्तं नीतिमन्तं करोति । यद्यपि राजपुरुषा अप्यन्यायिनं नीतिशास्त्रानुसारेण दण्डयन्ति । किन्तु न तेन स नीतिमान् भवति नाऽप्यन्यायो नश्यति । धर्मस्तु प्रेम्णाऽन्यायं नाशयित्वा जनतां नीतिमतीं करोति । एतदर्थमेवाऽस्मिन् युगे धर्मस्याऽऽवश्यकता । "

२. "धनिका विद्वज्जनोचितमानन्दं कदाऽपि नाऽनुभवन्ति,विद्वांसस्तु यदृच्छया धनिकोचितमानन्द मनुभवितुं समर्थाः । द्वयोर्मध्ये इयानेव भेदः ।"

३. "समग्रसम्प्रदायस्था जैनास्तु कदाचिदैक्यं प्राप्स्यन्ति । किन्त्वस्मास्वेव द्वादश भ्रातृषु त्रयोदश महानसाः सन्ति । यदि ते एकीभवन्ति तदा बाढं भवेत् । परन्तु सर्वे 'वचनेष्वेव धनिकाः' स्वार्थं तु नैव त्यजन्ति, ततश्चैक्यं कथं भवेत् ? ।"

४. "जैनधर्मस्तु महान् विशालश्च । तादृशो विशालो न कस्याऽपि धर्मः । स न सङ्कुचितः, किन्त्वस्माभिः स कूपमण्डूकायितऽस्ति । पुनः कथं स विशालीक्रियेत ? कथं तस्य विशालताऽर्पणीया एतदर्थमस्माकं



Jain Education International For Private & Personal Use Only www.jainelibrary.org

सामर्थ्यं नाऽस्ति। यद्यप्येतदस्माकं शक्तिगोचरं नास्ति तथाऽपि यदि प्रयतेमहि तदा तत्कर्तुं क्षमामहे ।"
(वीरनिर्वाणस्य पञ्चविंशशताब्दीनिमित्तमहोत्सवप्रसङ्गे ।)

## अथ तेषां विषये केषाञ्चिद् बहुश्रुतानां सुविश्रुतानां चाऽभिप्राया दर्श्यन्ते –

१. "ममाऽङ्गतमनुभवं कथयामि - तेषु मया विशालवटवृक्षस्य शीतलच्छायाऽनुभूता, निर्झरस्य निर्मलजलस्य मधुरताऽऽस्वादिता, कुटुम्बस्य पितामहस्य छत्रच्छाया तत्सान्निध्ये प्राप्ता, मातृहृदयगतं वात्सल्यं तच्चरणयोः प्राप्तं मया। एतत् सर्वं स्मृत्वा हृदयं विषण्णं भवति - अद्यप्रभृति को मे मस्तके वात्सल्यरससरसं हस्तं प्रसारयेत् ?।" (-मुनिराजश्रीशीलचन्द्रविजयजित् )

२. "शास्त्राभ्यासेन तैर्मध्यस्थवृत्तिः, सहिष्णुता, सर्वधर्मसमभावभावना इत्यादयोऽनेके गुणाः स्वात्मनि प्रकटिताः। मम स्मृत्यनुसारं कदाऽपि तैः साम्प्रदायिककलहो न कृतो नाऽप्येकान्तेन साम्प्रदायिक-विचारणाऽऽदृता स्वीकृता वा। निजवाणी-वर्तनयोः सर्वदा स्याद्वादसिद्धान्तायैव तैरग्रस्थानं दत्तम् ।"
(पण्डितवर्यश्रीबेचरदास जीवराज दोशी )

३. "धर्मक्षेत्रे तदेवाऽन्तिमं सत्यं यद् -' यया सत्क्रियया राग-द्वेषौ क्षीयेते सैव यर्थाथा सत्क्रिया। सा सत्क्रिया तु देशातीता कालातीता च। कोऽपि देशः कालो वा न तद्बाधकः। स देशः कालो वा तस्याः सत्क्रियाया साधको भवेदपि किन्तु बाधकस्तु नैव भवेत्। इदं सत्यं पूज्यवर्याणां जीवने साकारीभूतं तदेव च तेषां जीवनस्पर्शिबहुश्रुततायाः कीर्तिगाथाऽभवत्।
(पण्डितवर्यश्रीदलसुखभाई मालवणिया)

४. "अपूर्वं पाण्डित्यं, उत्तमदार्शनिकता, विस्मयकरं ज्योतिः-शिल्पशास्त्रयोस्तलस्पर्शि ज्ञानं, निष्प्रतिमवक्तृत्वकला, पीयूषप्रस्यन्दिनी वाणी, असाधारणा कवित्वशक्तिः, अदृष्टपूर्ववत्सलभावः, निरभिमानता, उदारता, अनाग्रहः, व्याख्याने समग्रधर्माणां रोचक-तार्किक-बुद्धिगम्य-साधक-विधा-यकसमन्वयः, विद्याप्रियता, गुणज्ञता, मर्मज्ञता, जैनधर्मस्य च सनातनतत्त्वानां हृदयङ्गमा व्याख्या - एषा सम्पत्तिरस्माकमाचार्यप्रवराणां प्रतिभासम्पन्नव्यक्तित्वस्याऽसामान्यलोकप्रियतामूलमासीत्। अनेनैव च कारणेन भक्तिनम्रा जैना जैनेतराश्च तान् प्रत्यभूतपूर्वतयाऽऽकृष्टाः।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अनया सर्वोत्तमसम्पत्त्याऽऽकरपाण्डित्येन च सह, जनमानसं तदन्तःस्थविचारांश्च सम्पूर्णतया बोधकरी प्रज्ञावत्ता, तांश्च विचारान् निजसुधाशीतलविधायक-तार्किकयन्त्रेण शोधयित्वा तं च जनं वात्सल्यामृतरसेन स्नपयित्वाऽनुकूलीकरणस्य विरलरचनात्मकलौकिकताऽस्मदाचार्यवरेण्यस्वभावे प्रतिपदं प्रत्यक्षीभवन्ति दृश्यते। नूनं तेऽ**भिनवशासनसम्राज** आसन्।"

(श्रीभालचन्द्र दयाशङ्कर कवि-स्तम्भनपुर)

५. " कवीश्वर! जैनेषु तु श्रीनन्दनसूरिजिन्महाराजा एवाऽद्वितीया दृश्यन्ते।"

(ज्योतिर्विदाचार्यश्रीमथुराप्रसाद - काशी)

६. "यदाऽहमहमदाबादमागतस्तदा पूज्यवर्याचार्याणां दर्शनमेव ममाऽपूर्वोपलब्धिरासीत्। सुप्रभावितोऽहं तैरस्मि। विश्वसिम्यहं यदीदृशा उदारचरिताः सरलस्वभाविनो महापुरुषा एव शासनहितं कर्तुं समर्थाः।"

(श्रीऋषभदास रांका)

७. "यथा ते गहनशास्त्राभ्यासित्वात् सैद्धान्तिकप्रश्नान् बुद्ध्वा तान् निराकर्तुं समर्थास्तथैव निजव्यापक-व्यवहारबुद्ध्या श्रीसङ्घे धर्मशासने वोत्थितप्रश्नानां मर्म विदित्वा तानपि निराकर्तुमतीव कुशला आसन्। निजजीवने प्राप्ताया लोकप्रियताया महत्कारणमियं व्यवहारदक्षतैवाऽऽसीत्।"

(श्रेष्ठीवर्यश्रीकस्तूरभाई लालभाई)



Jain Education International For Private & Personal Use Only www.jainelibrary.org

## आस्वादः

## ॥ चिन्तनधारा ॥

-मुनिरत्नकीर्तिविजयः

सर्वं परवशं दुःखं, सर्वमात्मवशं सुखम् ।
एतदुक्तं समासेन, लक्षणं सुख-दुःखयोः ॥

(योगदृष्टिसमुच्चयः श्लो.१७२)

**व्याख्या** : 'सर्वं यत् परवशं-पराधीनं वर्तते तद् दुःखं,यच्चाऽऽत्मवशं-स्वाधीनं तत्सर्वं सुखरूपम्' इत्येतत् समासेन-सङ्क्षेपेण सुख-दुःखयोः-सुखस्य च दुःखस्य च लक्षणं-स्वरूपमुक्तं-कथितम् ।

**विवरणम्**: अनादिकालादारभ्य समग्रप्राणिसृष्टेर्विशेषेण च मनुष्यस्य सुखं त्वभीप्साविषयो वर्तते । अन्यस्मिन् प्राणिजाते मनुष्ये चैकमन्तरं वर्तते, यद् - इतरप्राणिनः स्वकीयायां वर्तमानायां परिस्थितौ यत्सुखरूपं तस्य स्थैर्यार्थमेव प्रयतन्ते । यतो नास्त्येतस्माद् विशेष-बोधोपलब्धिस्तेषाम् । मनुष्यस्तु प्राप्तसुखस्य वृद्ध्यर्थं सततं प्रयतते । तथाऽपि तस्य प्रत्येकं प्रवृत्तौ सुखविषयकातृप्त्यभिलाषावेव दृग्गोचरीभवतः ।

'सन्त्यनवरतं सुखप्राप्तावेव मनुष्यस्य प्रयत्ना' इति सत्यवदेतदपि तथ्यं यत् स नाऽद्याऽपि सुख्यभवत् । मनस्तु सुखाधारत्वेन तेन स्वीकृतमिति तत्र कारणम् । मनस्तु सततं परिवर्तनशीलम् । परावर्तत एव मनःस्थित्याः परिवर्तनेन मनुष्यस्य सुखव्याख्याऽपि । एतस्मात्कारणादेव 'एकत्र सुखं दृष्ट्वा तत्प्राप्त्यर्थं स परिश्रमं करोति, प्राप्नोत्यपि च । अथ-'अद्यतोऽहं सुखी'ति मत्वा यावत् स तिष्ठति तावत् किञ्चिदेवं घटते येन सर्वं तन्मनसि नीरसमिवाऽऽभाति । अधुना तु न तत्प्राप्तिस्तस्य सुखाय भवति । पुनरपि सोऽपरत्रप्रयत्नमादरति । ' भूतश्चैतदखण्डप्रक्रमो मनुष्यस्य, यत्-यदर्थं मन आदिशति यच्चेच्छति तस्मिन् प्रयत्नः कार्यः ।

कीदृशीयं विडम्बना ! यत् मनुष्यः सुखं मृगयते, तदपि स्वस्वीकृतमार्गेणैव । स्वाङ्गीकृत-व्याख्यायां यन्न समाविशति तन्न सुखमिति स मन्यते । मनसस्तरङ्गाननुसृत्यैव स सर्वत्र धावति । यत्र च तिष्ठति ततोऽप्यग्रमेव सुखं पश्यन् पुनस्तदर्थं धावति । पुनः पुनरेवमेव करोति ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अस्यां प्रवृत्तौ चित्रं त्वेतद् यत्-शक्तौ ज्ञाने च सर्वोपरित्वेन वर्तमानो मनुष्यो जीवनपर्यन्तं निष्फलं प्रयतमानः सन् एकवारमपि नैवं विचारयति यद्-'यदहं करोमि तत्किं सुखप्राप्तेर्वास्तविकोपायोऽस्ति न वा ?' यदीत्थं प्रश्नो भवेत् तदा विवेको जागृयात् यद् -'यद्येष एव सुखस्य वास्तविकोपायो मार्गो वा तर्हि समग्रं जगदायुगान्तरादेवमेव चेष्टते तथाऽपि न केनाऽप्येतन्मार्गगामिना सुखस्याऽन्तः प्राप्तः। 'अहं पूर्णः सुखी'ति कथयितुं न कोऽप्यलम्। अत एतस्मादन्यस्य कस्याऽप्युपायस्य शक्यता वर्तते' इति।

एवं विवेको यस्य चेतस्युद्भवति स मार्गं प्राप्नोत्येव। किन्तु सुखैषिणो जनस्य स्थितिर्मृगमदार्थं भ्रमन्मृग इव वर्तते। अत्र - स मृगोऽज्ञानतयैवैवं चेष्टते, मनुष्यस्तु मनोऽधीनत्वेन विवेकं ज्ञानं वाऽनुपयुञ्जानः सन् प्रवर्तते - इत्येतावन्मात्रमेव भिन्नत्वम्। स्थितेः सत्योऽवबोधोऽशक्य एव मृगस्य किन्तु मनुष्यः सत्यप्राप्तये समर्थोऽस्ति। तस्याऽस्ति दिग्दर्शनं कारयद् बलिष्ठं ज्ञानरूपमालम्बनम्। ज्ञानाद् यो यावान् दूरः स सत्यतोऽपि तावानेव दूरः। एवं सत्याद् यो दूरः स सुखादपि दूर एव। ज्ञानिनो महापुरुषाः स्वकीयायाः साधनायाः पारावारं समग्रतयाऽवगाह्य वास्तवानुभूतिं कुर्वन्ति। पश्चाच्चाऽनुभवसिक्तहृदयात् यच्छब्दरूपेणोद्भवति तदेव शास्त्रम्। दृष्टिमुद्घाटयन्ति शास्त्राणि। दृष्ट्युद्घाटनेनैव वस्तुस्थितिर्ज्ञातुं शक्या। अन्यथा भ्रान्तावेव भ्रमणं भवति। 'वयं तु आभासिक्याः परिस्थित्या एव सुखप्राप्तये यत्नवन्तः स्मः' - इत्येतदेव रहस्यमद्यपर्यन्तमस्मदीयाया प्रवृत्त्या निष्फलत्वे वर्तते।

एतेन श्लोकेन सूरिपुरन्दराचार्यश्रीमद्**हरिभद्रसूरि**पुङ्गवाः सदसद्विवेकं परिज्ञाप्य वास्तवदर्शनं कारयन्ति। अस्मिन् श्लोके नाऽस्ति केवलं सुख-व्याख्या, अपि तु स्थिरसुखस्याऽनुभवपूतो बोधो विद्यते। 'सर्वं परवशं दुःखम्'-अनेन दुःखस्य स्वरूपं दर्शयन्ति। यद्-यत्पराधीनं तत्सर्वं दुःखरूपमेव।

मनुष्यस्त्रिभिर्माध्यमैः सुखप्राप्तौ यतते। तस्य सर्वे प्रयत्ना एषु त्रिष्वेव समाविशन्ति। प्रथमं - स किञ्चिदिष्टवस्तु वाञ्छति, द्वितीयं- यत्र मनो लग्नं तं जनं स्वकीयं कर्तुमिच्छति, तृतीयं च - सर्वथाऽनुकूलमेकं वातावरणं रचयितुं प्रवर्तते।

एषु त्रिषु प्राप्तेषु सत्सु स मन्यते यद्-अहं सुखी। किन्तु वस्तुतस्तत्सुखं कोऽनुभवति ? एष



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तु एषणापूर्त्या भविता मनस एव तोषो न त्वात्मनः । अथ यन्नाऽऽत्मतत्त्वं साक्षात् स्पृशति तत्कथं सुखत्वेनाऽभिधीयेत ? वस्तुजन्यं मनुष्यजन्यं वातावरणजन्यं वा सुखं न पारमार्थिकं, त्रिभिर्व्यवहितत्वात् । त्रिभिरेभिस्तु मन एव सुखित्वं भजते । अत एव यद्येतत्त्रयं नश्यति परिवर्तते वा तर्हि व्यथयति । अपरं च, यदि तेभ्यो मनो विरक्तिभावमाश्रयेत् तदाऽपि दुःखस्यैवोद्भवः । अत एव - यन्न साक्षादात्मप्रत्यक्षं तन्न सुखमिति सत्यम् ।

अथ यत्र नाऽऽत्मप्रत्यक्षत्वं तत्राऽस्ति पारवश्यम् । तच्च दुःखरूपमेव । अत्राऽस्ति च पुद्गल-पारवश्यम् । '**पुद्गलैः पुद्गलास्तृप्तिं यान्त्यात्मा पुनरात्मना**' इति वचनात् । अत्र त्रिष्वपि पुद्गल एव प्राधान्येन वर्तते । ततश्च पुद्गलस्वरूपं मन एव तृप्तिं प्राप्नोति, न त्वात्मा, अपौद्गलिकत्वात् । पुनश्च यदस्थिरमपरं चाऽऽलम्बते तत्कथं शाश्वतमात्मतत्त्वं प्रीणयितुं शक्तम् ? सुखत्वेनाऽपि च कथं तद् व्याख्येयम् ?

सर्वद्रव्यसार्थं संयोज्याऽयसः पिण्डात् सुवर्णप्राप्त्यर्थं यतमानो जनः कस्या अपि क्षतेर्योगात् सुवर्णमलभमानः सन् पीतवर्णं लब्ध्वैव तत्र कनकप्राप्तेस्तोषं लभेत तदा तस्मै किं वक्तव्यं स्यात् ? यत्तत्र कथयितव्यं तदेवाऽस्माकमप्यनुसरति । वयमपि विवेकं न जानीमः । विफलं पुरुषार्थमेवकेवलं कुर्मः । किन्तु, यदा विवेको जागृयात् तर्ह्येव दिक्परिवर्तनं भविष्यति । तत्पश्चादेव च सत्यसुवर्णवत् वास्तविकमात्मप्रत्यक्षं सुखं प्राप्तुं शक्यम् ।

सुखं त्वात्मतत्त्वस्य शाश्वतपर्यायः स्थिरस्वभावश्चाऽस्ति । तत्तु न मार्गणविषयः किन्तूद्घाटन-विषयो वर्तते । सुखं नाऽऽविष्कारं प्राप्नोति किन्त्वाविर्भावमेव । सुखस्य सम्बन्धोऽस्तित्वेन सहाऽस्ति न तु जन्यत्वेन । यदस्तित्वं तत्सर्वदा स्वाधीनमेव ।

अथ सांसारिकं सर्वमवस्थान्तरं यदि पराधीनं तर्हि किं स्वाधीनम् ? किं चाऽऽत्मवशम् ? निःस्वार्थभावेनैव यदि सर्वत्र प्रेम वितीर्यते भवता तर्हि तत्प्रेम स्वाधीनम् । नोद्भवति तत्प्रेम कस्या अपि बाह्यपरिस्थित्या किन्तु स्वान्तत एवोद्गच्छति । '**न खलु बहिरुपाधीन् प्रीतयः संश्रयन्ते**' । इति वचनात् । अत एव स्वाधीनम् ।

सर्वेषु स्वाभिलषितपदार्थेषु स्वायत्तीभावेन वर्त्तमानेष्वपि तैः सह साधनत्वेनैव यो व्यवहरति, तेषु च स्वकीयत्वाग्रहरहितः सन्ननासक्तभावेन यो वर्तते, सा तस्याऽनासक्तिः स्वाधीनाऽस्ति ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अपरं च-कदाचिद् भवेदेवं यन्न स्यात् किञ्चिदपि पार्श्वे, तथाऽपि पुण्यजन्यस्थितेर्लाभालाभाभ्यां हर्षशोकावकुर्वाणः सन् प्रसन्नतयैव यस्तिष्ठति, तस्य सा प्रसन्नताऽपि स्वाधीनैव । अल्पमप्यन्यस्य सत्कार्यं दृष्ट्वा निर्दम्भः प्रमोदभावो यद्युद्भवेत् तदा स प्रमोदोऽपि स्वाधीनः कथ्यते ।

समासतः सर्वे एव गुणाः स्वाधीनाः । यतः सर्वे गुणाः सर्वाश्च सद्वृत्तयोऽन्त एव वर्तन्ते । केवलं समीक्ष्योद्घाटनमेवाऽऽवश्यकम् । गुणाश्च यदोद्घटिता भवन्ति तदाऽऽत्मनि यदनुभूतिविषयीभवति तदेव सुखम् ।

उपर्युक्तानां तदन्येषां च सर्वेषां गुणानां प्रकटीकरणमेव तात्त्विकं सुखम् । अत एव कथितं- 'सर्वमात्मवशं सुखम् ।' सङ्क्षेपेण चैतदेव सुखस्य दुःखस्य च स्वरूपम् । इति शम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# ॥ धर्मस्वरूपम् ॥

-मुनिधर्मकीर्तिविजयः

धम्मो मंगलमुक्किट्ठं अहिंसा संजमो तवो।
देवा वि तं नमंसंति जस्स धम्मे सया मणो ॥

छाया- (धर्मो मङ्गलमुत्कृष्टमहिंसा संयमस्तपः।
देवाः अपि तं नमस्यन्ति यस्य धर्मे सदा मनः ॥)

**पदार्थः** - अस्मिन् जगति धर्म एवोत्कृष्टं मङ्गलमस्ति। स धर्मः त्रिधा भवति-अहिंसा संयमः तपश्च। सदा-सर्वदा, यस्य मनो धर्मे रममाणं स्यात्, तं देवा अपि नमस्कारं कुर्वन्ति।

**विवरणम्** - जैनसङ्घे, विशेषतः श्रमणसमुदाये श्रीदशवैकालिकसूत्रस्योपलब्धिः कल्याण-रूपाऽस्ति। वर्तमानकाले महामङ्गलकारि श्रीदशवैकालिकसूत्रमेव विशुद्धाराधनयाऽल्पेनैव कालेन परमपदप्राप्तावमोघं साधनमस्ति।

पूर्वधरमहात्मा **श्रीशय्यंभवसूरीश्वरः** श्रीदशवैकालिकसूत्रमारभमाणो द्वौ पदार्थौ निरूपयति, धर्मस्य स्वरूपं धर्मस्य माहात्म्यं च।

तत्र, धर्मस्य स्वरूपं किम् ?

ग्रन्थकारेण विशुद्धधर्मस्त्रिविध उक्तः। अहिंसा संयमस्तपश्च। यत्र एतत्त्रिकं तत्र धर्मोऽस्त्येव। गौण- मुख्यभावेनैतेषां त्रयाणां साहचर्यमस्ति, अविनाभावित्वात्। कुत्रचिदहिंसायाः, कदाचित् संयमस्य, कथञ्चित् तपसश्च प्राधान्यं तु भवत्येव।

अस्मिन् श्लोके वर्णिताः त्रयो भेदा आभ्यन्तरधर्मं प्रतिगत्यर्थं धर्महेतवः सन्ति।

तत्र प्रथमा अहिंसा।

सम्यग्ज्ञानश्रद्धानपूर्विका प्राणिवधात् निवृत्तिरेवाऽहिंसा। अहिंसा धर्मस्य मूलमस्ति। सर्वभूतानां दया एव महाधर्मः। प्रभूतैः कष्टदायिभिरनुष्ठानैरलं, यदि तत्राऽहिंसाधर्मो नाऽस्ति।

श्रीसोमप्रभसूरिणा **सिन्दूरप्रकरे** कथितम् -



Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्रीडाभूः सुकृतस्य दुष्कृतरजः संहारवात्या भवो-
दन्वन्नौर्व्यसनाग्निमेघपटली सङ्केतदूती श्रियाम्।
निःश्रेणिस्त्रिदिवौकसः प्रियसखी मुक्तेः कुगत्यर्गला
सत्त्वेषु क्रियतां कृपैव भवतु क्लेशैरशेषैः परैः ॥

अहिंसाया वास्तविकं स्वरूपं ज्ञातुं हिंसायाः स्वरूपं ज्ञातव्यम्।

ततो हिंसा का ?

पूर्वधरश्रीउमास्वातिवाचकमुख्येन तत्त्वार्थाधिगमसूत्रे प्ररूपितम् -

"**प्रमत्तयोगात् प्राणव्यपरोपणं हिंसा।**"

जीवानां प्राणेभ्यो वियोगो हिंसा , अथवा त्रस-स्थावरजीवानां हननं हिंसा। हिंसाया एतत् स्थूलस्वरूपं तु सर्वे जानन्ति, किन्तु हिंसायाः सूक्ष्म-स्वरूपमतिगहनम्। एतदपि विमर्शनीयम्।

मनसाऽपि केषामपि जीवानामशुभचिन्तनं हिंसा।

सूक्ष्मजीवान् प्रति दुर्भावो हिंसा।

जीवानामनादरो हिंसा।

अयतना हिंसा।

जिनाज्ञाभङ्गो हिंसा।

अनुपयोगो हिंसा।

प्रमादो हिंसा।

आश्रवो हिंसा।

जिनशासनाराधनास्तम्भनिभश्रीईर्यापथिकीसूत्रे दशभिः प्रकारैः हिंसायाः सूक्ष्मस्वरूपं वर्णितमस्ति। हिंसाया एतादृशं स्वरूपवर्णनं जिनशासनं विना कुत्राऽपि न सम्भवति।

अस्माकं सर्वेषां जीवनेऽहिंसायाः प्रमाणं प्रचुरमस्ति। वयं सदा धर्माराधनाः कुर्मः, किन्त्वनुपयोगेन। अनुपयोगस्तु हिंसा, ततोऽस्माभिर्यो धर्मः क्रियते स न विशुद्धः कथ्यते, तत्र हिंसासत्त्वात्।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

एतादृशहिंसातो निवृत्तिरेवाऽहिंसा इति कथ्यते।

यतनाऽहिंसा।

जिनाज्ञापालनमहिंसा।

उपयोगोऽहिंसा।

अप्रमादोऽहिंसा।

यदि कस्मिन्नपि प्रवृत्तिकाले मनसि-हृदये यतनाभावो वर्तेत तर्हि कर्म-बन्धो न भवेत्।

सार्धशतगाथात्मकस्तवने वाचकश्री**यशोविजयो**ऽप्याह-

[१] यतनाभावे न कर्मबन्धः।

एवं यतनावानात्मा हिंसापङ्कैर्न मलिनो भवति। यतनारहिता शुद्धप्रवृत्तिरपि शून्यफला वन्ध्योपमा च कथिता।

यतना पापनाशिका।

यतना मोक्षमार्गसाधनी।

यतना सज्जनसहचरी।

संयमिन आत्मान एवैतादृश्या यतनायाः पालनं कर्तुं समर्था भवन्ति।

ततो ग्रन्थकारेणाऽहिंसाया पश्चाद् द्वितीयो भेदः संयमो वर्णितः।

सम्यक् प्रकारेणेन्द्रियादीनां दमनं - नियमनं संयमः।

चित्ते वर्तमानानामशुभवृत्तीनां निरोधः संयमः।

अपेक्षया संयमः संवरतत्त्वस्यैव भेदोऽस्ति। ततोऽभिनवकर्मणां रोधनमपि संयमः। स संयमः सप्तदशविधोऽस्ति।

प्राणातिपात-मृषावाद-अदत्तादान-मैथुन-परिग्रहस्वरूपाश्रवाद्विरमणं, पञ्चानामिन्द्रियाणां निग्रहः, कषायचतुष्कविजयः, मनोदण्ड - वचनदण्ड - कायदण्डेभ्यो विरतिः।

यत्राऽहिंसा संयमश्च तत्र तपोऽस्त्येव, एतेषां परस्परमविनाभावित्वात्। ततस्तृतीये भेदे तपः कथितम्।

---

१. કર્મબંધ નહીં જયણાભાવે૦ ઢાળ ૪-૭ દોઢસો ગાથાનું સ્તવન



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तपनमिति तपः।

अष्टप्रकारं कर्मौघं तापयतीति तपः।

ताप्यन्ते रसादिधातवोऽनेनेति तपः।

अनन्तभवनिकाचितकर्मणो दहनं कर्तुं तप एव समर्थं, नाऽन्यत् किमपि। अन्याभिर्धर्माराधनाभिः पुण्यबन्धो भवति, किन्तु निर्जरा तु तपसैव भवति।

श्रीवाचकमुख्येन श्रीतत्त्वार्थाधिगमसूत्रे कथितम् -

**तपसा निर्जरा च।**

अत्राऽपि यदि पुण्यबन्धस्पृहया तपः क्रियेत तदा तपसा निर्जरा न भवति, तत्र निःस्पृहत्वाभावात्।

शास्त्रेषु तपो द्विविधमुक्तम् - बाह्यतपः आभ्यन्तरतपश्च। तत्र बाह्यं तपः षड्विधम् - अनशनं, ऊनोदरता, वृत्तिसङ्क्षेपणं, रसत्यागः, कायक्लेशः, संलीनता च।

आभ्यन्तरतपोऽपि षड्विधम् - प्रायश्चित्तं, विनयः, वैयावृत्त्यं, स्वाध्यायः, उत्सर्गः, ध्यानं च।

अत्र बाह्यतपसा शरीरशुद्धिस्तथाऽऽभ्यन्तरतपसाऽऽत्मिकशुद्धिर्भवति। एतेनाऽऽत्मनो मलिनवासनादिविकारा नश्यन्ति।

एतद् धर्मस्य स्वरूपम्।

अथ धर्मस्य माहात्म्यं किम्?

ये उपरि वर्णितं धर्ममाराधयन्ति तेषां जीवने कदाऽपि जरा-मरण-शोक-क्लेशाद्युपद्रवा न प्रविशन्ति। सदा तेषां जीवने कल्याणपरम्परैव प्रसरति। तथा एतादृशान् धर्माराधकानात्मनो देवा अपि नमस्कारं कुर्वन्ति, स्तुवन्ति।

तत आत्महितकाङ्क्षिभिराराधकैरेतादृशो विशुद्धो धर्म आराधनीयः, इति मे मतिः।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

आस्वादः

# ॥ सर्वं सत्त्वे प्रतिष्ठितम् ॥

-मुनिकल्याणकीर्तिविजयः

सत्त्वैकतानवृत्तीनां प्रतिज्ञातार्थकारिणां।
प्रभविष्णुर्न देवोऽपि किं पुनः प्राकृतो जनः ॥

**अन्वयः** - सत्त्वैकतानवृत्तीनां प्रतिज्ञार्थकारिणां देवोऽपि न प्रभविष्णुः, किं पुनः प्राकृतो जनः ?

**विवरणम्** - सत्त्व एव एकनिष्ठतया प्रतिष्ठिता वृत्तिर्येषां धीरपुरुषाणां तेषामस्मिन् जगति नाऽस्ति किमप्यसाध्यम्। अतो यदा ते धीराः स्वमनसि किञ्चिदपि कार्यं स्वकर्तव्यतयाऽङ्गीकुर्वन्ति तदा तन्निर्वाहे आपतन्तं किमपि कष्टं न गणयन्ति, यावत् प्राणत्यागेऽपि कार्यान्तं प्राप्नुवन्ति। स्वकार्ये दृढतया प्रवर्तमानानेतादृशान् सात्त्विकप्रकृतीन् धीरान् चालयितुं, स्वकीयसामर्थ्येन त्रिजगतीमपि चालयितुं क्षमा अचिन्त्यशक्तियुक्ता देवा अपि यदि प्रवर्तन्ते कदाचित् , तदा ते न प्रभवन्ति, न शक्तिमन्तो भवन्ति। यत्र देवा अप्यशक्तास्तत्र , स्वकार्येऽप्यन्यसहायापेक्षिणः सामान्यजनाः किं कदाचिदपि समर्था भवन्ति ? नैव भवन्ति।

यदेकदा सत्त्वमूर्त्तिर्विक्रमो राजकुमारावस्थायां देशान्तराणि भ्रामं भ्राममवन्तीपुरीं प्राप। नगर-परिसरं प्राप्तेन तेन पटुपटहध्वनिराकर्णितः। ततस्तेन पटहवादकाय तत्कारणे पृष्टे तेन कथितं - "योऽस्य नगरस्य राजा भवितुमिच्छति स पटहं स्पृशतु।" एतच्छ्रुत्वा सत्वरं तेन पटहः स्पृष्टः। ततश्च ज्ञातव्यतिकरै राजपुरुषैर्नृपसौधं नीत्वा तत्क्षणमेव सोऽभिषिक्तः कथितश्च - "अस्य राज्यस्य वैरी कोऽपि सुरोऽसुरो वाऽस्ति। स च सर्वदैवाऽस्मभ्यं कुपितः, य एवाऽस्य राज्यस्य राजा भवति तं निहन्ति। यदि राजा न भवति तदा देशनाशं करोति। अतो यदि भवान् कमप्युपायं कर्तुं शक्तस्तदा कुरु यद्वा यमातिथीभव।"

एतन्निशम्याऽतीवमेधाविना तेन नूतनराजेन चिन्तितं -'अयं सुरोऽसुरो वा मया भक्त्या शक्त्या वा प्रसादनीयः। अतः प्रथमं भक्तिं कृत्वा तमनुनेतुं प्रयते। यदि स प्रसन्नस्तदा सिद्धं मे



Jain Education International For Private & Personal Use Only www.jainelibrary.org

समीहितम्। यदि वा क्रोधं न मुञ्चति तदा दण्डनीतिं योक्ष्ये।'

ततस्तेन राजपाकशालायां नानाभक्ष्ययुता सरसरसवती कारिता। ततस्तत्सर्वं सुवर्णमयभाजनेषु सज्जीकृत्य स्वीयशयनागारे संस्थापितं, स्वस्य च पल्यङ्कोपरि निजोत्तरासङ्गेनोच्छीर्षकमाच्छाद्य मनुष्याकृतिरिव विहिता। स्वयं तु निजाङ्गरक्षैः परिवृतः सन् खड्गहस्तो दीपच्छायायां निलीय सावधानस्तिष्ठति।

निशीथसमये वातायनद्वारे प्रथममट्टहासशब्दः श्रुतः। ततश्च धूमप्रसरो ज्वालान्वितो दृष्टः। तन्मध्ये च विकरालस्वरूपेणाऽऽगच्छन् वेतालस्तेन विलोकितः। अन्तरागतेन वेतालेन बुभुक्षा-क्षामकुक्षित्वाद् दृष्टमात्रमेव सर्वमपि भोजनं भुक्तम्। ततो गन्धद्रव्यैः स्वशरीरं विलिप्य सुगन्धि ताम्बूलं च मुखमध्ये क्षिप्त्वा सन्तुष्टः स पल्यङ्के उपविष्टः। ततस्तच्छायायां निलीनं विक्रमं दृष्ट्वा कथयति -"अहो! किमेतत् सर्वं त्वया मदर्थं प्रगुणीकृतम् ?"

"आमि"ति प्रोच्य विक्रमेणोदितं -" को भवान् ? "

तेनोक्तं -"अहं देवराजेन्द्रप्रतीहारतया प्रसिद्धोऽग्निवेताल- नामा प्रेतराजः।अस्य राज्यस्य वैरित्वात् प्रत्यहमेकैकं राजानं मारयामि। किन्तु तव भक्त्या प्रीणितोऽहमभयदानपूर्वकमेतद् राज्यं ते ददामि। परमीदृशी रसवती गन्धताम्बूलादि च सर्वदैव मदग्रे ढौकनीयं त्वया। "

विक्रमेणोक्तं - " प्रसादितोऽहं भवद्भिः। सदैव वो भक्तिं करिष्यामि। "

एवंक्रमेण कतिपयदिनेषु व्यतीतेष्वेकदा विक्रमेण वेतालो निजमायुः पृष्टः। तदा तेनोक्तं - "नाऽहं जानामि। किन्तु महेन्द्रमापृच्छ्य श्वस्त्वां कथयिष्ये। "

अन्यस्यां रात्रौ समागत्य तेनोक्तं -" भवान् सम्पूर्णशतवर्षायुष्मानिति महेन्द्रेणाऽऽदिष्टम्। "

पुनरपि राज्ञा - " भवान् मम सुहृत्। अतो महेन्द्रं निवेद्य तच्छक्त्या ममाऽऽयुरेकेन वर्षेण हीनमधिकं वा कारये "त्युपरुद्धः। इदमुररीकृत्य गतः सोऽन्यस्यां निशि समागत्योवाच-"मित्र! महेन्द्रस्याऽपि नेदृशी शक्तिर्यया स भवदायुर्नवनवतिमेकोत्तरं शतं वा कुर्यात्। "

एतच्छ्रुत्वा परस्मिन् दिने विक्रमः सर्वं भक्ष्यभोज्यादिकं निषिध्य स्वयं च सङ्ग्रामाय सज्जीभूय वातायनसमीपो तिष्ठति। स तु वेताल आगतः सन् भोज्यादिकमपश्यन् राजानं हन्तुं धावितः। सोऽपि सावधानतया तेन सह योद्धुं लग्नः। चिरं तयोर्युध्यमानयो राज्ञाऽवसरं लब्ध्वा स पृथिव्यां



Jain Education International For Private & Personal Use Only www.jainelibrary.org

पातित:। ततस्तस्य हृदि चरणमारोप्याऽसिधारया स्पृष्ट्वाऽऽदिष्टवान् -

"रे वेतालपांसन! तवेष्टदैवतं स्मर। अधुना तव प्राणान् हरिष्यामि।"

एतन्निशम्य चकितेन वेतालेनोक्तं -"अहो सत्त्वमूर्ते! तवाऽनेनाऽद्भुतसाहसेनाऽतीवतुष्टोऽहमग्निवेतालनामा प्रेतराजस्ते सिद्ध:।"

एवं सत्त्वशालिनस्तस्य राज्यं निष्कण्टकमजनि।

अत एवोक्तमपि -

**"सत्त्वं जीवनतत्त्वं व्यर्थं तेन विनाऽपि श्रीमत्त्वम्।**
**धीमत्त्वं बलवत्त्वं तदेवाऽनुसरति स्वत्वमपि॥"**



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# ॥ काव्यानुवादयुगलम् ॥

-मुनिधर्मकीर्तिविजयः

ઈશ્વર
આગલા જન્મમાં
શું ચિત્રકાર હતો ?
એને આટલી બધી
રંગની માયા કેમ લાગી ?
ભૂરું આકાશ, લીલા વૃક્ષો
કાળા વાદળ, મેઘ ધનુષ્ય
આ તો જાણે કે ઠીક
પણ કઈ રેશમની પીંછીથી
એણે
આટલા બધાં ફૂલો ચીતર્યાં?

- સુરેશ દલાલ

किं
ईश्वरो गते जन्मनि
चित्रकार आसीत् ?
अन्यथा
किमर्थं तस्य
इयती रङ्गमाया ?
नीलं गगनं, हरिता वृक्षाः,
श्यामानि अभ्राणि,इन्द्रायुधम् ....
अथवा, आस्तामेतत्
किन्तु ,
स कया तूलिकया
एतानि कुसुमानि अरजत् ?



Jain Education International For Private & Personal Use Only www.jainelibrary.org

-मुनिधर्मकीर्तिविजय:

ઈશ્વરને
જ્યારે
ઈન્દ્રધનુષી રાગોમાં
ગાવાનું મન થયું હશે
ત્યારે-
ફૂલોનું સર્જન કર્યું હશેન ! -રમેશ પટેલ

यदा
ईश्वरस्य हृदये
शक्रचापीयै रागैः
गायनमनोरथोऽभविष्यत्
तदैव
स विविधपुष्पाणि अस्रक्ष्यत् !



Jain Education International For Private & Personal Use Only www.jainelibrary.org

कथा

# ॥ धर्म एव वरं धनम् ॥

- मुनिरत्नकीर्तिविजयः

एकदा शरशय्यास्थितो भीष्मपितामहो युधिष्ठिरं प्रति प्राह - " देवा ब्राह्मणाः सन्तो यक्षाश्च सर्वे धार्मिकानेव पूजयन्ति, न तु धनाढ्यान् कामिनो वा। त्वदुपर्यपि यद्देवाः प्रसन्नाः सन्ति तस्याऽपि कारणमेतदेव यत् त्वं धार्मिकः धर्मनिरतमतिश्चाऽसि। धने सुखलेशो वर्तते किन्तु धर्मे परमं सुखं वर्तते। मत्कथनस्य पुष्टावेकां कथां शृणु " -

आसीदेको ब्राह्मणः। एकदा तस्य धनप्राप्तेरिच्छाऽभूत्। तेन विचारितं, यद् -' यदि मां धन-प्राप्तिः स्यात्तर्हि यज्ञं करिष्यामि।' ब्राह्मणत्वाद् धनप्राप्तेरन्य उपायो न कोऽपि तेन लब्धः। अतो देवतानां प्रतिपत्तिरादृता। सर्वे देवाः सर्वाश्च देव्यः पूजिताः सन्तोऽपि न किञ्चिदपि तेन लब्धम्। अथ तेन विचारितं -' एतेषां सर्वेषां देवानां परितो याचकानां महासमुदायो वर्तते। अपरं च , सर्वेषां जनानां प्रतिपत्तिं प्राप्य देवा अपि धृष्टा एव भूताः। अत आशुतोषः कोऽपि देवो मया शोध्यः।'

एवं विमर्शं कुर्वता तेनैको जलधरदेवदूतो नाम्ना कुण्डधार आकाशे भ्रमन् दृष्टः। तेन तस्य पूजा कृता। धूप-दीप-फल-पुष्पादिभोगान् ढौकयित्वा तं प्रसन्नं चाऽकरोत्। तद्भक्त्या प्रीणितः कुण्डधारश्चिन्तयति स्म , यत् -' यदीयत्या भक्त्या न किमपि प्रतिफलं दद्यां तर्हि कृतघ्नो भवेयम्। अपरं चाऽस्मिन् जगति सर्वस्मात् पापान्मुक्तिः शक्या किन्तु कृतघ्नताया नाऽस्ति किञ्चिदपि प्रायश्चित्तम्।' इति विचिन्त्य तद्ब्राह्मणस्य हितकरणार्थं स्वर्गमगच्छत्।

तत्राऽऽसीन् मणिभद्रनामा देवः। पुण्यवद्भ्यो राज्यादिसुखस्य दानं, पापात्मनां च सकाशात् तस्याऽपहरणमिति तस्य कार्यमासीत्। कुण्डधारस्तत्र गत्वा तमनमत्।

मणिभद्रेण पृष्टः सः - " भो कुण्डधार! किं वाञ्छसि त्वम् ? "

कुण्डधारोऽकथयत् -" एष विप्रो मे भक्तोऽस्ति। अतस्तस्य सुखमिच्छामि।"

मणिभद्रोऽवदत् -" साधु साधु। यद्येतस्मै ब्राह्मणाय तव धनाभिलाषस्तर्हि कथय, कियद्



Jain Education International For Private & Personal Use Only www.jainelibrary.org

धनं वाञ्छसि ? तदनुरूपमहं दास्यामि।"

मणिभद्रस्यैतत्कथनं श्रुत्वा कुण्डधारश्चिन्तयति -'क्षणमात्रेण म्रियते जनः। धनेनैव स सुखीकर्तुं न मया शक्यः। अतो 'भूयात् तस्योद्यमस्तपसि' एतदेव शोभनम्।' इति विचार्य मणिभद्रं प्रति प्राह -" भो देव! एतस्मै ब्राह्मणाय नाऽहं धनमिच्छामि। रत्नमौक्तिकादिभिर्भृतां पृथ्वीमपि न वाञ्छामि। किन्तु, 'स धर्ममतिर्भूयात्' एवं वरं याचे।"

'एष कुण्डधारोऽधिकं मार्गयति। एतावत्तु न दातुमुचितम्', इति विमृश्य मणिभद्रः कुण्डधारं प्रति प्राह -" मित्र! धर्मादपि राज्यादिसुखमेव लभते जनः। तत्तु त्वद्भक्ताय प्रथममेव ददामि। अतः किमत्र विचारणीयम्? अपरं च, राज्यादि सुखं भुञ्जानस्य तस्ययावच्चिन्तादिकारणं तदप्यहमपसारिष्यामि।कथय, एतावता प्रसन्नस्त्वं न वा ?।"

एतच्छ्रुत्वा कुण्डधारो व्याकुलोऽभूत्। 'परिश्रमं विना वैभवं भुञ्जानस्या-ऽधःपातोऽवश्यं भावी'ति विचिन्त्याऽवदत् -" न न। मद्भक्ताय नाऽहं धनं राज्यं वा दातुमुत्सहे। कृपया तं धार्मिकं कुरुध्वम्।"

कुण्डधारस्यैतत् कथनं श्रुत्वा निकटस्थिताः सर्वे देवाः प्रसन्ना अभूवन्। मणिभद्रेणाऽपि प्रसन्नीभूय वरो दत्तः - " सुष्ठु! एष त्वद्भक्तो ब्राह्मणो धार्मिको भवतु।"

---

इतः, पृथिव्यां स ब्राह्मणः प्रभूतश्रमे कुर्वत्यपि दरिद्र एव स्थितः। तेन स शोकाकुलो बभूव। मनसि च चिन्तयामास -'तेन जलधरदेवेन कथितं यत् कृतघ्नतातुल्यः पापो नाऽस्ति। तथाऽपि नाऽद्यपर्यन्तं तेन मदर्थं किञ्चिदपि कृतमस्ति। अतोऽलं प्रयत्नेन। अधुना तु वनं गत्वा तपः कर्तुमुचितम्।'

एवं निराशीभूय देवकृपया च स विप्रो धर्मपरायणोऽभूत्। तत्र वने स देवानभ्यागतांश्च प्रपूज्यैव यच्छेषं कन्दफलादि वर्धते तद् भक्षयति। कियता

कालेन तत् त्यक्त्वा पर्णानि भोक्तुमारब्धानि। पश्चात् तान्यपि परित्यज्य जलेन निर्वाहं कर्तुं लग्नः। अन्ततो गत्वा वायुभक्षणमात्रेणैव स जीवितं निर्वहति।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवमेव प्रभूतकालो व्यतीतः। तथाऽपि स क्षेमान्वितो वर्तते। श्रद्धापूर्वकं तपस्तपता तेन दिव्यदृष्टिः प्राप्ता। ईश्वर इव ज्ञानवानभवत्। स्वसङ्कल्पानुसारं सर्वं द्रष्टुं श्रोतुं च समर्थोऽभूत्। कस्य-चिदपि च कालस्य वृत्तान्तं ज्ञातुं स प्रभुरभूत्।

एतादृशा ज्ञानेन तेन ज्ञातं, यद् 'कस्मैचिदपि राज्यं धनं वा दातुमहमिच्छेयं तर्हि तन्मम वाण्या शक्यमस्ति। मद्वचनं चाऽमोघं भूतम्।'

---

अथ स कुण्डधारोऽप्येवंरीत्या तपः कुर्वन्तं तं ब्राह्मणं दृष्ट्वाऽधिकं प्रीतिभागभूत्। विप्रपार्श्वं च गत्वा तमकथयत् -" त्वया दिव्यदृष्टिः प्राप्ता। अधुना समस्तलोकं दृष्ट्वा सर्वेषां नृपाणामवस्थां पश्य।"

विप्रेणाऽप्येवं कृतम्। तेन दृष्टं यदनेकनृपा नरकावनावतीव दुःखं सहमानास्तिष्ठन्ति। पुनरप्यवदत् कुण्डधारः -" त्वया मद्भक्तिः कृताऽस्ति। अतो - दुःखफलाद् राज्यादिसुखान्न तव कल्याणमस्ति, इति विचिन्त्यैव तन्न मया तुभ्यं दत्तम्। पश्यैतेषां लोकानां दुर्दशाम्। तेषां कृते पिहितान्येव सन्ति स्वर्गद्वाराणि। अत एवं दृष्ट्वा न राज्यादिसुखं केनाऽपि जनेनाऽभिलषणीयम्।"

ब्राह्मणोऽपि कुण्डधारं प्रणम्य गद्गद्स्वरेणाऽवदत् -" अहो! कियानयमुपकारः ? लोभाभिभूतेन मया न त्वत्स्नेहो ज्ञातः। अहं तु निर्गुणशेखरोऽस्मि। भो देव! क्षमस्व मे मन्तुम्।" इति।

एवं कथां समाप्य भीष्मपितामहः प्राह -" स्वकीयतपोबलेन स ब्राह्मणश्चतुर्दशलोकेषु भ्रमणार्थं शक्तोऽभवत्। अतो धार्मिक एव सर्वत्र पूज्यो न तु धनिकः।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

कथा

# ॥ तक्रयोग्यं रामायणम् ॥

-मुनिधर्मकीर्तिविजयः

आसीत् रमणीयमेकं नगरम् । तत्रैको नर्मदाशङ्करनामा ब्राह्मणोऽवसत् । तस्य भार्या मङ्गलाऽऽसीत् पुत्रश्च कपिलः ।

तेन ब्राह्मणेन गृहे एका पीना गौः पालिता आसीत् । ततो गृहे सर्पिः, नवनीतं पयश्च सर्वदोपलभ्यमानान्यासन् । तक्रमपि प्रतिदिनं प्रचुरं लभ्यते स्म । ततः स निजप्रातिवेश्मिकेभ्यः प्रतिदिनं तक्रमयच्छत् ।

एकदा तन्मनसि विचारः स्फुरितो, यद् -'विना मूल्यं तक्रस्य दानं नोचितम् । ततस्तस्य किमपि मूल्यं ग्रहीतव्यम् । किन्तु, शास्त्रे ' तक्रं न कदाऽपि विक्रेयम् । यस्तक्रात् प्रति धनं गृह्णाति स नरकं गच्छती'त्युक्तम् । ततः केनाऽप्युपायेन तक्रमूल्यं ग्रहीष्यामि ।'

अथैकदा तन्निकटवर्तिप्रातिवेश्मिकस्तक्रं ग्रहीतुं तत्पार्श्वमागतः । तस्य ब्राह्मणस्य च चिरात् परस्परं वैरमासीत् । तं दृष्ट्वा ब्राह्मणेन कथितं -" भो मित्र! अद्यप्रभृत्यहं विना मूल्यं तक्रं नो दास्ये । किन्तु यदि त्वं सम्पूर्णं रामायणमश्रावयिष्यस्तर्हि ते विना मूल्यं तक्रमार्पयिष्यम् । "

वञ्चनापटुर्ब्राह्मणोऽजानादेव यत् -'को मूर्खः योऽल्पतक्रार्थं रामायणं श्रावयेत् ? स नूनं मे किञ्चिद् धनं दत्त्वा तक्रं ग्रहीष्यति ।' अतस्तेन 'सर्पोऽपि न म्रियेत, यष्टिरपिन भज्येते'त्युक्तिमनुसृत्यैव तस्य रामायणं श्रावयितुं कथितम् ।

किन्तु सोऽपि तक्रार्थी सुचतुर आसीत् । स आह - " भो ब्राह्मण! यदि तव रामायणस्य शुश्रूषाऽस्ति तदा सावधानीभूय शृणु ।"

**आदौ रामतपोवनाधिगमनं हत्वा मृगं काञ्चनं**
**वैदेहीहरणं जटायुमरणं सुग्रीवसम्भाषणम् ।**
**वालीनिर्दलनं समुद्रतरणं लङ्कापुरीदाहनं**
**पश्चाद् रावण-कुम्भकर्णहननं एतद्धि रामायणम् ॥**



Jain Education International For Private & Personal Use Only www.jainelibrary.org

एतच्छ्रुत्वा कुपितो ब्राह्मण उवाच - "भो! न त्वेतत् वाल्मीकिरामायणं नाऽपि तुलसीरामायणम्। तर्हि कीदृग् रामायणमेतत् ?

तदा तेनाऽपि प्रातिवेश्मिकेनाऽऽक्रोशपूर्वं कथितं - "ब्राह्मण! एतत्तु तक्रयोग्यं रामायणम्। एतादृग् रामायणमेवाऽल्पतक्रस्य मूल्यम्।"



Jain Education International For Private & Personal Use Only www.jainelibrary.org

कथा

# ॥ झेनकथा ॥

-मुनिधर्मकीर्तिविजयः

कस्मिंश्चित् नगरे सुवर्णासक्त एकः 'चाइ'नामा जनोऽवसत् । तस्य येन केनाऽपि प्रकारेण सुवर्णप्राप्तेर्लालसाऽऽसीत् ।

एकदा पण्यवीथिकायां भ्रमन् स्वर्णकारापणमपश्यत् । ततः स सर्वेषु जनेषु पश्यत्स्वेव स्वर्णकारस्य सर्वं सुवर्णं चोरयित्वाऽनश्यत् । किन्तु त्वरितमेव स ग्रामजनै रक्षकैश्च बन्दीकृतः ।

तत आरक्षकेण पृष्टं - " भो! प्रभूतलोकमध्ये त्वं कथं स्वर्णं चोरयितुं प्रायतेथाः ? "

तदा तेन कथितं- " तदाऽहं केवलं सुवर्णमेवाऽपश्यं, न त्वन्यत्किमपि । अतोऽहं सुवर्णं गृहीत्वाऽनश्यम् । "

बोधः - "धर्ममाराधयद्भिरस्माभिरपि सर्वमन्यत् विस्मृत्य धर्मार्थमेव यतितव्यम् । "



Jain Education International For Private & Personal Use Only www.jainelibrary.org

कथा

# ॥ बादरायणसम्बन्धः ॥

-मुनिकल्याणकीर्तिविजयः

वैक्रमे दशमशताब्दे मालवदेशे न्यायान्यायक्षीरनीरविवेचनहंसः परमविद्वत्तासमलङ्कृत उदारहृदयोऽत्यन्तसज्जनो भोजाभिधानो राजा राज्यं चकार।

तस्य सदसि बहवः पण्डिता आसन्। एतेषु कविप्रकाण्डं श्रीकालिदासोऽशिरोमणीयत। स परहृदयाविद्भिर्महार्थैश्च काव्यैर्नृपमनो मोदयमानः तस्य पूर्णप्रीतिभाजनं बभूव। दिनानुदिनं भोजस्य स्नेहो तस्मिन् ववृधे। ततश्च द्वावपि परमसुहृत्तां भेजतुः।

अथ राजा सदैव कालिदासेन सह विजहार, सुभाषितकाव्यादिविनोदेन च समयाकरोति स्म।

अन्यदा वासन्तदिने श्रीभोजभूपो महाकविना सह वनविहाराय जगाम। सौरभऋतुत्वात् वनराजयः पूर्णतया विकस्वरा आसन्। तौ द्वावपि प्राकृतिक सौन्दर्यस्याऽतीवरसिकौ कालमवज्ञाय रथारूढौ सन्तौ बहुदूरं गतवन्तौ, अस्तमये च ज्ञातवन्तौ यदावां सुदूरमागतौ।

" यद्यधुना धारां प्रति गच्छेव तर्ह्यध्वन्येव रात्रिर्भवेत्, तमसि च मार्गोऽपि न विलोक्येते" ति कालिदास उवाच।

राजा स्माऽऽह - " किं कर्तव्यमधुना कविवर्य! ? "

कालिदासः - " स्वामिन्! अत्राऽन्तिके ग्रामं सम्भावयामि।

यतः बुक्कतां शुनां शब्दाः श्रूयन्ते।" इत्यवदत्, " चलतु

भवान्, रात्रिं तत्रैव गमयिष्यावः " इत्यन्वरौत्सीच्च।

" किन्तु कविराज! तत्राऽऽवां कस्य गृहे रात्रिवासं करिष्यावः ? तत्राऽस्माकं न कोऽपि जानाती"ति पृष्टम्।

तदा कालिदासोऽवक् - " महाराज! बुद्धिचातुर्येण वाङ्माधुर्येण चाऽज्ञातोऽपि मित्रीक्रियेत।"

"तर्हि रथमग्रे प्रस्थापय। अद्यतनीं रात्रिं त्वत्कृतसखगृहे निवत्स्यावः।" इति भोजराजो बभाण।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततश्चाग्रे प्रस्थितौ तौ द्रुतमेवैकं ग्रामं प्राप्तौ। तत्र ग्राममध्ये नयनरम्यमेकं गृहं दृष्ट्वा कालिदासस्तदभ्याशे रथमस्थापयत्।

रथचक्रस्य ध्वनिं श्रुत्वा तद्गृहस्वामी गृहाद् बहिरागत्य तौ निरैक्षत। तत 'अज्ञातावेतौ' इति विमृश्याऽपृच्छत्- " आगन्तुकौ! अहं युवां नोपलक्षये, भवन्तौ कौ ? मम च भवद्भ्यां कीदृक् सम्बन्धः ? "

तदेङ्गितेन भोजस्याऽऽज्ञां प्राप्य कालिदास इतस्ततो व्यलोकतैकं च बदरीवृक्षं दृष्ट्वोवाच -

" अस्माकं बादरं चक्रं युष्माकं बदरीतरुः।
एतस्मात् कारणान्नूनं यूयं वयं वयं यूयम्॥ "

एतच्छ्रुत्वाऽतिमुदितो गृहेशस्तौ द्वावपि निजगृहमानीय यथानुरूपं सत्काराद्यकरोत्।

तदा भोजराज उवाच - " सत्यं तव कथनं कालिदास!, बुद्धिचातुर्येण वचोमाधुर्येण चाऽज्ञातोऽपि मित्रायते। "



Jain Education International For Private & Personal Use Only www.jainelibrary.org



# ॥ मधुरेण समापयेत् ॥

## ॥ को मूर्खः ? ॥

-मुनिरत्नकीर्तिविजयः

(एको जनो भृत्यमाह्वयति। आगच्छति च भृत्यः।)

**जनः** (भृत्यं प्रति) भो ! एषा मञ्जूषा काचपात्रैर्भृताऽस्ति। एषा च मद्गृहं नेतव्या। किमेतत् कार्यं त्वं करिष्यसि ?

**भृत्यः** आम् करिष्यामि।

**जनः** तर्हि कथय, कियन्मूल्यमेतत्कार्यस्य त्वयाऽभिप्रेतम् ? भृत्यः - यदुचितं ज्ञेयं भवता तद्देयम्।

**जनः** सुष्ठु। यद्येवं तर्हि शृणु, तव भृत्यकार्यस्य मूल्यं यद्यहं द्रव्यरूपेण दास्ये तर्हि अल्पेनैव कालेन तद् व्ययीभविष्यति। अतोऽहं मार्गदर्शनरूपेण वाक्यत्रिकं तुभ्यं कथयिष्यामि। तत्तु जीवनपर्यन्तं तवोपयोगि भविष्यति।

(एतच्छ्रुत्वा ओमित्युक्त्वा मञ्जूषां मस्तकोपरि प्रस्थाप्य भृत्यश्चलितुं प्रवृत्तो- ऽभूत्। व्यतीते कियत्यपि काले तेन भृत्येन प्रथमवाक्यार्थं जनः स्मारितः। अतः -)

**जनः** (भृत्यं प्रति) शृणु। '**भृतादुदराद् रिक्तमुदरं शोभनम्।**' यद्येवं कोऽपि वदेत् तर्हि तस्यैतद्वृत्तान्ते मा कुरु विश्वासम्।

(पुनर्मौनमवलम्ब्य द्वावपि मार्गे चलतः। कियन्मार्गमुल्लङ्घ्य-)

**जनः** अधुना द्वितीयं वाक्यं शृणु।

'**अश्वारोहणात् पादाभ्यामेव गमनमुचितम्**'

कोऽपि यद्येवं जल्पेत् तर्हि स जनो न विश्वसनीय एवं मन्यस्व।

(एवंक्रमेण तावुभावपि गृहद्वारं प्राप्तौ। तदा भृत्येन तृतीयवाक्यार्थमाकाङ्क्षा दर्शिता।)

**जनः** भो! मम तृतीयमन्तिमं वाक्यं त्वेतदस्ति, यत्

-'**त्वत्तोऽधिको मूर्खो भृत्यः कोऽप्यस्मिन्नगरे निवसति**' एवं केनाऽप्युच्यते तदा तन्मा मन्यस्व।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्याकर्ण्य मस्तकस्थां मञ्जूषां गृहद्वाराग्रभागे उच्चैर्निक्षिप्य भृत्यो जनं प्रति गम्भीरध्वनिनाऽवदन् - भवन्तं प्रति वाक्यमेकमहमपि कथयामि, तच्छृणु-

'**अस्यां मञ्जूषायामेकमपि काचपात्रमखण्डं वर्तते**' इत्येवं यदि कोऽपि वदेत् तर्हि भवता न तद्वचनं स्वीकर्तव्यम्। इति।

## ॥ पुनरेकशः ॥

**-मुनिधर्मकीर्तिविजयः**

एकदा नवशिक्षितसङ्गीतः कश्चित् कस्मिंश्चिन्नगरे गतः। तत्र नगरखण्डे निजकार्यक्रम आयोजितः। नागरिकाः सङ्गीतरसिकाः कलामर्मज्ञाश्चाऽऽसन्।

अतः सर्वे तं श्रोतुं सभां गतवन्तः।

कलाकारेण सारङ्गरागे निजगीतगानमारब्धम्। कियद्भिः क्षणैः पूर्णीभूते गीते जनैः सहस्तताल-मुच्चैर्निघोषः कृतः-"पुनरेकशः गातव्यं पुनरेकशः !"इति।

गायकस्तु लोकशुश्रूषां ज्ञात्वा पुनरपि तस्मिन्नेव रागे गातुं प्रवृत्तः। गानावसाने पुनस्तदेव गातुमुच्चैःकथितं -"पुनरेकशः गातव्यं पुनरेकशः !"इति। एवं द्वि-त्रिवारान् कथितम्। तदाऽऽनन्दितः कलाकार आह - "सज्जनाः! अधुना तु मयकैक एव रागः प्रदर्शितः। भवन्तोऽन्यानपि रागान् श्रोतुमर्हन्ति।"

तदा लोकैः कथितं-"**यावद् भवान् सम्यग्रीत्या तद्गीतं न गास्यति तावद् वयं भवता तदेव गापयिष्यामः।**"

## ॥हास्यं निषिद्धम्॥

**-मुनिकल्याणकीर्तिविजयः**

**कथाकारः** (कथायां) भो लोकाः ! ये नरा यादृशं कर्म इह जन्मनि कुर्वन्ति ते परलोके तदनुरूपमवतारं प्राप्नुवन्ति। यथा क्रोधिनो नराः श्वावतारं,



Jain Education International For Private & Personal Use Only www.jainelibrary.org

कपटशीला: शृगालावतारमित्यादि।

**शामजीकुम्भकार:** प्रभो! किं मम गर्दभावतारो लप्स्यते ?

**कथाकार:** उपविश उपविश। एक एवाऽवतारो वारं वारं न प्राप्यते।

---

**अकब्बर:** (भोजनसमये) वीरबल! वृन्ताकशाकमतीव स्वादु न वा ?

**वीरबल:** अवितथमेतत् स्वामिन्! नानाव्यञ्जनै: संस्कृतं वृन्ताकशाकं विहायाऽस्मिन् जगति न किञ्चिदपि स्वादु।

(अन्यदा)

**अकब्बर:** अरे! बेगम! किं प्रत्यहमेतदेव विरसं वृन्ताक-शाकं भोक्तव्यम् ? वीरबल! एतच्छाकमत्यन्तविरसं वर्तते न वा ?

**वीरबल:** सत्यमुक्तं प्रभो! भवता। इह लोके वृन्ताकशाकं विना न किमपि विरसमस्ति।

**अकब्बर:** रे वीरबल! तत्र दिने त्वमेवाऽस्य शाकस्य प्रशंसामकरोरद्य पुनस्त्वमेवैनं निन्दसि ?

**वीरबल:** प्रभो! भवदाज्ञाकारी सेवकोऽहं, न तु वृन्ताकस्य।

---

(मिथ: प्रतिस्पर्धिनौ द्वौ विद्वांसावेकस्यामतिसङ्कीर्णरथ्यायां मिलितौ, उभावप्यन्योन्यं मार्गं न प्रदत्त:। तदा -)

**एक:** भो! अहं मूर्खेभ्यो न कदाऽपि मार्गं ददामि।

**द्वितीय:** अहं तु ददामि। (भवान् गच्छतु।)



Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org